CC-0. Digitized by eGangotri and MIDF- Delhi

दृष्टिसृष्टिनाटकम्

जयतु संस्कृतम्
केन्द्रीयकार्यालयः, काष्ठमण्डपः, नेपालः
दूरभाषः ०१-५७०५३७१

प्रा. रामहरिदाहालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् इति संस्थाया ऊनत्रिंशत्तमं (२९) प्रकाशनम्

दृष्टिसृष्टिनाटकम्

रचनाकारः
प्रा. रामहरिदाहालः

प्रकाशकम्
जयतु संस्कृतम्
नेपालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकस्य नामः दृष्टिसृष्टिः

पुस्तकनाम-	आचारिकं नाटकम्
रचनाकारः	प्रा. रामहरिदाहालः
प्रकाशकः -	जयतु संस्कृतम्, नेपालः ।
प्रकाशनमितिः-	आषाढस्य ११ दिनाङ्के (नेपाले समायोजितस्य एकोनविंशतितमस्य विश्वसंस्कृतसम्मेलनस्य २०८२।३।१२-१६ शुभावसरे) ।
प्रकाशनप्रतिः-	पञ्चशतम्
सर्वाधिकारः-	रचनाकारे
मूल्यम्-	रूप्यकाणि- ३५०/-
मुद्रणालयः-	किशोर अफसेट प्रेस प्रा.लि.
ISBN :	978-9937-9491-8-7

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीयम्

नेपाले २००४ तमे विक्रमवर्षे एकतन्त्रीयस्य राणाशासनस्य विरोधे सर्वश्रीकस्य पूर्णप्रसादब्राह्मणस्य विमर्शे श्रीभद्रशर्म-राजेश्वरदेवकोटा-कमलराजरेग्मी-पद्म-राजाधिकारि-काशीनाथ-गौतमानां नेतृत्वे सञ्चालितं जयतु संस्कृतमिति नामकम् आन्दोलनं नेपालस्य शैक्षिकराजनैतिकेतिहासे महत्त्वपूर्णं स्थानं बिभर्त्ति । एवञ्च २०५४ तमे विक्रमसम्वत्सरे तेन आन्दोलनेन स्वस्य पञ्चाशत्तमवर्षस्योपलक्ष्ये स्वर्णमहोत्सवस्यायोजनां विधाय २०५५ विक्रमसंवत्सरे तदान्दोलनं जयतु संस्कृतमिति संस्थायां रूपान्तरयित्वा अस्याः स्मरणे तीनधारापाकशालायाश्-छात्रावासस्य वाग्रे स्मारकस्तम्भः स्थापितः ।

तस्यां संस्थायां रूपान्तरितायां सत्यामनया प्राच्यभाषाधर्मसंस्कृति-परम्परामूल्यमान्यतानां संरक्षणसंवर्द्धने प्रचारश्च स्वस्याः प्रमुखमभियानं लक्ष्यीकृतम् । अथ च संस्कृतस्य लोकप्रियतां वर्धयितुं तस्य पठनपाठनयोः प्रक्रियां व्यापिकां सम्पादयितुं संस्कृतग्रन्थानां नेपाल्यां भाषान्तरेषु च अनुवादकार्यक्रमः कल्पितः । अनूदितानां प्रकाशनं संस्कृतस्य प्रचारप्रसारौ च कल्पितौ । नैपालिक्याः संस्कृतेः सभ्यतायाश्च संरक्षणं तदर्थं गोष्ठी-प्रशिक्षण-कार्याशालानां सञ्चालनमित्येतादृशाः कार्यक्रमा आयोज्यमानाः सन्त्यनया ।

अस्याः संस्थायाः प्रयासे नेपालस्य नेपालसर्वकारस्य च पुराणतमे समाचारप्रकाशने गोरखापत्रे दैनिके प्रतिमासं संस्कृतपत्रद्वयं २०७२ विक्रमवर्षस्य आषाढमासस्य प्रथमदिनतः (जयतु संस्कृतमिति दिवसतः) पाक्षिकरूपेण प्रकाश्यमानं भजते । एवमेव जयतु संस्कृतमिति संस्थायाः प्रयासे २०७५ भाद्रस्य षष्ठगतदिनतो नेपालटेलिभिजनतः (नेपालदूरदर्शनतः) संस्कृतसमाचाराः प्रसार्यमाणाः विलसन्ति । लोकसेवाऽऽयोगे संस्कृतपत्रमेकं रक्षणीयमिति प्रयासे सर्वाणि पत्राणि साधारणानि कृतानि सन्ति । नेपालप्रज्ञाप्रतिष्ठाने संस्कृतविभाग-सञ्चालने, नेपालस्य मुक्तविश्वविद्यालयेऽन्येषु विश्वविद्यालयेषु च संस्कृतस्य विषयविभागान् स्थापयितुं प्रयासा जायममानाः सन्ति । द्वन्द्वकाले पिहितद्वाराणां संस्कृतमाध्यमिकविद्यालयानां पुनःस्थापनायै संस्कृतगुरुकुलानां सुदृढतायै संस्थेयं सक्रिया वर्तते । उत्तरमहाभारतग्रन्थलेखने, संस्कृते मौलिकग्रन्थानां लेखने, तत्र प्रेरणाप्रदाने संस्थेयं सदा जागरूका अस्ति । संस्कृतनाटकानां लेखने तन्मञ्चने च संस्थेयं कार्यं कुर्वाणा वर्तते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मौलिकस्य संस्कृतग्रन्थस्य प्रकाशितस्य च मूल्याङ्कनं विधाय तदाधारेण जयतु संस्कृतम् इति पुरस्कारेण अद्यपर्यन्तं षोडश विद्वांसः पुरस्कृताः सन्ति । १. पं. भीमकान्तपन्थी (२०५६,जगदम्बिकावैभवं महाकाव्यम्) २.पं धनञ्जयमरासिनी (२०५७, हरिहरप्रार्थनापुष्पाञ्जलिः, संस्कृतकाव्यम्), ३. डा हरिहरशर्मा अर्यालः (२०५९, संस्कृकाव्यत्रिवेणी), ४. प्रा.डा. माधवभट्टराई (२०५८), सत्यशाइ-चरितं महाकाव्यम्), ५. प्रा.डा.वेणीमाधवढकालः (२०६०) लिच्छविकालिकाना-मभिलेखानां साहित्यिकं परिशीलनम्), ६. चिकित्सको गोपाल-वैद्यः, किंजल्कः (२०६१ हिमाद्रिमहिमा (काव्यम्), ७. डा.लक्ष्मीकान्तपन्थी (२०६३ ऋतुविचारः सानुवादः) ८. प्रा.डा. टीकारामोऽधिकारी (२०६५, पद्यपुष्पाञ्जलिः, संस्कृतकविता-संग्रहः), ९. पं. लोकनाथलुइँटेलः (२०६६, श्रीरामशरणं मम, (काव्यम्), १०. प्रा.रोहिणीवल्लभपोखेलः (२०६७ भावावर्तः (कविता), ११ प्रा. टीकादत्तबरालः, (२०६८, तत्सम नेपाली व्युत्पत्ति शब्दकोश), १२.प्रा.डा. विष्णुराज-आत्रेयः (२०७१ हनुमदयन-महाकाव्यम्), १३. प्रा. रामहरिदाहालः (२०७३, गतो मदीयो ननु कुत्र देशः, संस्कृतभारतीगौरवम्), १४.डा. लक्ष्मीकान्त पन्थी (२०७५ काव्यमालिका (कविता, ५ खण्डकाव्यञ्च), १५. प्रा. नीलमणिढुङ्गाना, (२०७८, व्युत्पत्तिमूलक संस्कृत नेपाली शब्दकोश) १६.आचार्य पूर्णचन्द्रढुङ्गेलः, २०७९, देवाधिदेवमहादेव-श्रीनीलकण्ठमहाकाव्यम् ।

संस्कृतवाङ्मयस्य सेवाया आधारेण च संस्कृतविद्वांसो जयतु संस्कृतम् इति सम्मानेन सम्मानिताः सन्ति । तत्र सम्मानिताः विद्वांसः सन्ति- डा. स्वामी प्रपन्नाचार्यः (२०६९ फाल्गुनः), तदनु च विविधोपाधिना सह विद्वांसः सम्मानिताः । २०७२ वैक्रमाब्दस्य आषाढस्य १ दिनाङ्के आचार्यः प्रा.खेमराजकेशवशरणः (प्रवचनशिरोमणिः), प्रा.डा. वेणीमाधवढकालः (संस्कृतविद्याशिरोमणिः) सम्मानितौ । (खेमराजकेशवशरणः, तस्य काष्ठमण्डपं समागन्तुमशक्यत्वात् उपाध्यक्षो विष्णुप्रसाददेवकोटा, सचिवो नवराजकट्टेलश्च, देवघट्टं गत्वा सम्मानं समर्पितवन्तौ ।) २०७६ वैक्रमाब्दस्य फाल्गुनमासे प्रा विद्यानाथोपाध्यायः(तन्त्रन्यायविद्याकेशरी), शरत्कुमारभट्टराई (वेदान्तशिरोमणिः), प्रा. शिवगोपालरिसालः (वेदान्तविद्याकेशरी), प्रा.पुरुषोत्तमभट्टराई (न्यायविद्याकेशरी) च सम्मानिताः । २०८१ वैक्रमाब्दस्य भाद्रमासस्य ७ दिनाङ्के विद्वांसः सम्मानिताः, ते यथा प्रा.डा. ऋषिरामपोखरेलः (वेदविद्याशिरोमणिः), प्रा.डा. दीर्घराजघिमिरे (न्यायवेदान्तकेशरी), प्रा.डा. रामचन्द्रगौतमः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(धर्मशास्त्रविशारदः), प्रा.डा. गोविन्दचौधरी (न्यायविद्याकेशरी), प्रा. चेतोनाथ आचार्यः (प्रमाणशास्त्रविशारदः)।

जयतु संस्कृतमिति संस्थयैव थाइल्याण्डदेशे २०१५ तमे ईशवीयवर्षे षोडशतमे विश्वसंस्कृतसम्मेलने जाते नेपालेऽपि संस्कृतसम्मेलनमेतादृशं स्यादिति अस्मत् प्रतिनिधिद्वारा पत्रं सम्प्रेष्य कृतेऽनुरोधे सा प्रक्रिया अग्रे गता वर्तते। एतादृशस्य सम्मेलनस्य आयोजकेन सर्वकारीयेण विश्वविद्यालयेन भाव्यमिति व्यवस्थायाः सत्त्वात् पुनः जयतु संस्कृतम् इति संस्थया नेपालसंस्कृतविश्वविद्यालयः समनुरुद्धः। तदनुसारेण विश्वविद्यालयेन सर्वापि प्रक्रिया अग्रे सारिता, तदनुसारं वैक्रमाब्दस्य २०७५ आषाढमासे क्यानाडादेशस्य भ्यानकुवरमहानगरे सम्पन्ने विश्वसंस्कृतसम्मेलने नेपालस्य प्रस्तावः स्वीकृतः। अथ च २०१८ ख्रीष्टाब्देअष्ट्रलियादेशे अष्टादशतमं सम्मेलनं सम्पन्नम्। तत्र सञ्जातेन सम्मेलनेन २०२४ तमे ख्रीष्टाब्दे नेपाले तादृशसम्मेलनं भविष्यतीति घोषितमासीत्। तदनु नेपालसंस्कृत-विश्वविद्यालयेन विश्वसंस्कृतसम्मेलनस्य सम्पादनायात्र एका संयोजनसमितिश्च सङ्घटिता समासीत्। संस्कृतविश्वविद्यालयेन तद्व्यवस्थापने विलम्बो विहितः। अतः प्रयासान्तरेण २०८२ वैक्रमाब्दस्य आषाढमासस्य १२-१६, (सन् २०२५ जून २६-३०) दिनाङ्के विश्वसंस्कृतसम्मेलनं जायमानमस्ति। अस्य समायोजने जयतु संस्कृतमिति संस्थाया महती भूमिकास्ति।

भाषाऽऽयोगस्य पाठ्यक्रमविकासकेन्द्रस्य च ध्यानाकर्षणं संस्कृतसम्बन्धे कृतमस्ति। संस्थयानया संस्कृतलोकभाषाभियानमपि सञ्चालितम्। राष्ट्रियजनगणनायां संस्कृतमातृभाषाभियानञ्चाग्रे सारितम्। उच्चस्तरीयाय राष्ट्रियशिक्षाऽऽयोगाय (वि.सं २०७५) चास्माभिर्महत्त्वपूर्णाः परामर्शाः दत्ताः। तत्रास्माभिः प्रत्तान् अनेकान् परामर्शान् स्वीकृत्य आयोगस्य प्रतिवेदनस्य २०-२१ अध्याये ते समाविष्टाः। एवञ्च साधारणशिक्षायां प्रथमकक्षातोऽष्टमकक्षापर्यन्तं संस्कृतपत्रस्य सन्निवेशाय अनया संस्थया महान् प्रयासः कृतोऽस्ति।

अनया संस्थया ग्रन्थानुवादः प्रकाशनयोजना च स्वकीयस्योद्देश्यस्य मूलाधारे समाविष्टास्ति। तदनुसारं पूर्वकार्यसमित्या निवर्तमानेन चाध्यक्षेण प्राध्यापकेन विद्यानाथोपाध्यायेन संस्कृतभाषायां निबद्धानां दार्शनिकग्रन्थानामनुवादः प्रकाशनपरियोजनाचाग्रे सारितासीत्। तस्याः योजनायाः निरन्तरताधुनापि अग्रे प्रवर्द्धमाना एवास्ति। तदनुसारं वेदान्त-न्याय-मीमांसा-तन्त्र-जैन-बौद्ध-दर्शनानामनुवादः प्रकाशनञ्च विहितमस्ति। संस्कृतभाषायां रचितानां मौलिकग्रन्थानां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काव्य-नाटक-कथा-निबन्धादिग्रन्थानां सङ्कलनं, सम्पादनं, प्रकाशनञ्च कुर्वन् अग्रे गन्तव्यमिति संस्थायाः महदुद्देश्यं वरीवर्ति। आवश्यकतानुसारेण सामर्थ्यानुसारेण च ग्रन्थरचना-प्रकाशनानुसन्धानादि-कार्याणि च जायन्त एव।

अनया संस्थया नैरन्तर्येण संस्कृतलोकभाषाभियानं सञ्चालितं सञ्चालयिष्यते च। तस्य कृतेऽनेका गोष्ठ्यः कृताः, करिष्यन्ते च। संस्कृतसम्भाषणशिविराणि सञ्चालितानि, सञ्चालयिष्यन्ते च। सञ्चारमाध्यमेषु संस्कृतस्य प्रचारप्रसारौ कृतौ, करिष्येते च। अस्याभियानस्य अभिन्नाङ्गत्वेन संस्कृतरूपकसङ्ग्रह-ग्रन्थसम्पादनाय रूपकाणां सङ्कलनस्य, प्रकाशनस्य च योजना विहिता। तदनुसारेण अनेकानि रूपकाणि सङ्कलितानि प्रकाशितानि सन्ति। अस्याभियानस्य क्रमे प्रा. डा. नवराजकट्टेलवरेण स्वकीयानां लघुरूपकाणां लेखनं सम्पादनकार्यञ्च समकारि। कट्टेलस्य 'कर्मफलम्' इति संस्कृतरूपकसङ्ग्रहः प्रकाशितश्च। एवमेव संस्कृतनाटिकाकौस्तुभनामा रूपकसङ्ग्रहश्च प्रकाशितः।

नेपालेऽनया संस्थया संस्कृतलोकभाषाभियानं सञ्चालितम्। २०७६ वैक्रमाब्दे कोभिड-१९ व्याधिकारणेन संसारोऽवरुद्धः। वयं नेपालिनश्च स्वस्यैव गृहे पिनद्धाः। तदवसरे अनया संस्थया सप्तप्रदेशेषु (२०७७ वैक्रमाब्दे) 'नेपालस्य साधारणशिक्षायां संस्कृतस्य आवश्यकता' इति विषये जूमगोष्ठी विहिता। तदनु सप्तप्रदेशेषु (२०७७-२०७८) पञ्चदशदिवससंस्कृतभाषाप्रशिक्षणं विहितम्। सहस्रशो जनैः प्रशिक्षणे भागो गृहीतः। तदैव संस्कृतलोकभाषाभियानस्य महत्त्वं स्थापितम्। एवञ्च २०७८ वैक्रमाब्दे सम्पन्नायां राष्ट्रियजनगणनायां १४९०० जनताभिः संस्कृतं मम मातृभाषा इति पञ्जीकृतम्। षट्सहस्रेण (६०००) जनताभिः संस्कृतं मम द्वितीया भाषा इति, १,३५,००० जनताभिः संस्कृतं मम पूर्वजानां भाषा इति पञ्जीकृतमस्ति। नेपाले १२४ भाषा पञ्जीकृताः सन्ति तेषु संस्कृतभाषायाः क्रमः ५६ तमेऽङ्केऽस्ति। अनेन प्रयासेन अधुना संस्कृतं नेपालस्य राष्ट्रभाषासु स्थापितं वर्तते।

यतु संस्कृतम् २०५५ इति संस्थायाः संस्थापनापश्चात् आजीवनसदस्यो भूत्वा अस्याः संस्थायाः सक्रियतापूर्वकं सञ्चालने चास्य महनीया स्पृहणीया च भूमिकास्ति। जयतु संस्कृतम् इति संस्था नेपाले संस्कृतस्य संस्कृतशिक्षायाः संरक्षणाय विकासाय, प्रचाराय प्रसाराय च उल्लेखनीयं कार्यं कुर्वाण अग्रे गच्छन्ती वर्तते नेपालस्य संस्कृतप्रेमिणः जानन्त्येव।

नेपालिभाषायां कविता, खण्डकाव्यं, एकाङ्की, समालोचना, लेखाः, रचनादयश्च प्रकाशिताः प्रकाश्यमानाश्च विद्यन्ते। तद्वद् दाहालस्य संस्कृतभाषायामपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कविता, खण्डकाव्यानि, रूपकाणि, लेखाः, समीक्षाश्च प्रकाशिताः प्रकाश्यमानाश्च सन्ति ।

जयतु संस्कृतम् इति संस्था न केवलं रूपकरचनायां प्रकाशने च संलग्ना अपितु संस्कृतनाटकप्रदर्शने च कृतभूरिपरिश्रमशीलास्ति । रूपकाणां प्रकाशानन्तरं रङ्गमञ्चे नाटकप्रदर्शनस्य व्यवस्थायै च प्रयत्ना जायमाना सन्ति । प्रकाशितेषु रूपकेषु संस्कृतनाटकमहोत्सवस्यैव आयोजनां कर्तुमस्माकं प्रयत्नो भविष्यति । संस्कृतनाटकमञ्चनस्य प्रतियोगिताञ्च सञ्चालयितुं शक्यते । पारितोषिकस्य व्यवस्थाञ्च अग्रे सारयितुं पार्यते । संस्कृतनाटकरचनाकारेभ्यः प्रोत्साहनस्य पारितोषिकस्य नाटकप्रकाशनस्य च योजना तु पूर्वमेव घोषिता एव । अस्य कृते प्रा.रामहरिदाहालः लक्ष्याधिकानि रूप्यकाणि प्रदाय जयतु संस्कृतम् नाट्यपुरस्कारस्थापनाय अस्मान् प्रेरितवान् आसीत् । तदनु द्विलक्षराशियुतस्य नाट्यपुरस्कारस्य स्थापना च विहितास्ति । संस्कृतग्रन्थरचनायां ग्रन्थानुवादे च प्रा.डा. नवराजकट्टेलवेरण च ग्रन्थरचनानुवादपुरस्कारः स्थापितोऽस्ति ।

एवमेव नेपालस्य संस्कृतविदुष्यः संस्कृतरचनायमग्रे आगच्छन्तु इति धिया ताः प्रोत्साहनाय, जागरणाय च जयतु संस्कृतम् इति संस्था पृथगेव पुरस्कारस्य व्यवस्थायै चिन्तनशीलाऽस्ति । अस्य कृते अक्षयकोषस्य स्थापनायै मनस्विनां दातृणामन्वेषणं क्रियमाणमस्ति । अस्य कृते जयतु संस्कृतम् इति संस्थायाः निवर्तमानसदस्या श्रीमती विद्याकुमारीवज्राचार्या नारीपुरस्कारस्य कृते अक्षयकोशस्थापनाय एकलक्षं द्रव्याणि दत्वा नारीप्रतिभायाः विकासाय संस्कृचरनायां ताः प्रोत्साहनाय नारीप्रतिभापुरस्कारं स्थापितवती । एवमेव काष्ठमण्डपवास्तव्या श्रीमती-इन्दिरासापकोटा च एकलक्षं द्रव्याणि दत्वा उद्यमशालिनी-महिलाप्रतिभापुरस्कारश्चस्थापितवती ।

तस्य यथोचितव्यवस्था च विहितास्ति । नेपाल- संस्कृत विश्वविद्यालयस्य शैक्षिकसेवायामनेकाः विदुष्यः सन्ति परन्तु ते काव्यकृतिरचनायां नैव प्रवृत्ताः सन्ति । अतस्ता अपि संस्कृतस्य रचनायां संस्कृतस्य विकासाय विस्ताराय च प्रवृत्ताः भवेयुरिति जयतु संस्कृतमिति संस्थाया अभ्यर्थनास्ति ।

रामहरिदाहालः संस्कृतसाहित्यस्य महान् कविरस्तिं अनेन नाटकानि खण्डकाव्यानि, महाकाव्यञ्च लिखितमस्ति । महाकाव्यं प्रकाशनस्य प्रतीक्षायामस्ति, झटिति एव तस्यापि प्रकाशनं भविष्यति । अनेनैव विदुषा जयतु संस्कृतम् नाट्य पुरस्कारोऽपि स्थापितः । द्वयोः काव्योः कृते अनेन जयतु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतम् पारितोषिकम्(२०७५) प्राप्तः। स चासौ विद्वान् (वि.सं. २०११।४।२४) धादिङजनपदस्य बालकुमारी-लीलानाथदाहालयोः पुत्ररत्नत्वेन समजनि। गृहे एव परम्परायां समधीयानो दाहालः रानीपोखरी संस्कृतमाध्यमिकविद्यालयतः मध्यमापरीक्षां समुत्तीर्य वाल्मीकिविद्यापीठात् साहित्यविषयमवलम्ब्य आचार्यपरीक्षां समुत्तीर्णवान्। अनेन विदुषा धादिङजनपदस्यैव राधिकाज्ञानेन्द्रप्रसादयोः कुक्षिजयः सावित्रीनामिकया कन्यया सह पाणिग्रहणं विहितमासीत्। तयोः सन्ततयः यथा सृजना-प्रभा-प्रतिभा-सुधा--सुजातादाहालाः पुत्र्यः सन्ति चेत् पुत्रः प्रसन्नदाहालो आसीत् स चासौ कालयोगात् (२०८१।१२।२७ दिनाङ्के) दिवङ्गतः। स अमेरिकादेशे एरिजोनाप्रान्ते स्थपति (इन्जिनियर)त्वेन कार्यं प्रकुर्वाण आसीत्। अधुना रुविनाम्नी पुत्रवधूः पर्यावरणस्थपतित्वेन अमेरिकादेशे कार्यं कुर्वाणा अस्ति। तत्रैव दाहालस्य विधुनिभा नाम्नी एका पौत्री च विलसति। पारिवारिकपरिस्थितिः सामान्यं सुमधुरम्।

तदनु २०३५ वैक्रमाब्दे (भाद्रः १६तः) उपप्रशिक्षकरूपेण वाल्मीकिविद्यापीठे पाठयितुं प्रारब्धवान्। स्वकीयप्रतिभया, परिश्रमेण, प्रशिक्षणकौशल्येन च साहप्राध्यापकः, प्राध्यापको भूत्वा बहूनि वर्षाणि अनेन विदुषा संस्कृतसेवा विहिता। एन विभागाध्यक्षो भूत्वा कदा नेपालसंस्कृतविश्वविद्यालयस्य प्राज्ञिकसमितेः सदस्यो भूत्वा च संस्कृतसेवा व्यधायि। अयं सूरिः महेन्द्रविद्याविभूषणं, शिक्षासेवापुरस्कारः, दीर्घसेवापदकं च लब्धवान्। अस्य संस्कृतसाहित्यसूरेः 'अमरभारतीगौरवम्', (२०७३), 'गतो मदीयो ननु कुत्र देशः' (२०७३) संस्कृतकाव्यद्वयं अधिकृत्य २०७३ वर्षस्य जयतु संस्कृतम् पुरस्कारश्च अस्मै दत्तः। अनेनोदारमनस्विना 'जयतु संस्कृतं बालकुमारी-लीलानाथदाहालनाट्यपुरस्कार'श्च स्थापितः।

अनेन नेपालीभाषायां 'नेवारपानी' (२०५७) 'शान्तिको खोजी' (२०५७), 'सावित्री' (२०५८), इति त्रीणि खण्डकाव्यानि व्यलेखि। संस्कृतभाषाया 'अमरभारतीगौरवम्', 'गतो मदीयो ननु कुत्र देशः' इति द्वे खण्डकाव्ये प्रकाशिते स्तः। एन राधेश्यामभट्टराई वरेण लिखितं हलेसीखण्डकाव्यं संस्कृतभाषायां समच्छन्दसि अनुवादो विहितः। शिवपुराणस्य भर्तृहरिशतकत्रयस्य च नेपालीभाषायामनुवादो विहितः। संस्कृतनाटकेषु आचारिकं, गुरुकुलचर्यं, सत्प्रभवम्, दृष्टिसृष्टिः इति चत्वारिनाटकानि चत्वारि कर्मसिद्धि, शान्तिदूतः, प्रत्यादेषणम्, : शान्तिसंविदम् इति .एकाङ्कनाटकानि च विलिखितानि। एतेषां प्रकाशनं जयतु संस्कृतमिति संस्थया विहितम्। एवञ्च 'अवधेशचरितं महाकाव्यम्' प्रकाशनस्य प्रतीक्षायमस्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनेन ऋतम्भरा-जयतु संस्कृतं-मधुपर्कगोरखापत्र-कान्तिपुर-भानुप्रवाह-इत्यादिषु पत्रिकाषु च लेखाः प्रकाशिताः। जयतु संस्कृतं संस्थया सम्पादितयां संस्कृतकविगोष्ठ्यां प्रतिवर्षं संस्कृतकविता रचिता, श्राविता च, ताश्च कविताः संस्कृतकवितासङ्ग्रहे प्रकाशिताः।

छात्रजीवतादेव समाजसेवायां संलग्नो दृश्यतेऽयं सूरिः। जयतु संस्कृतं संस्थायाः आजीवनसदस्योऽस्ति। नेपालविश्वहिन्दुपरिषदः, कलङ्कीस्थज्येष्ठनागरिकसमाजस्य च आजीवन सदस्यो वर्तते। अयं कविःपर्वसुधाराभियानस्य परामर्शदाता, कलङ्कीस्थवैदिकसनातनधर्मसंस्थायाश्च परामर्शदाता, धादिङनीलकण्डप्रज्ञाप्रतिष्ठानस्य मानार्थसदस्यः वर्तते।

इदं नाटकं सर्वदैव सर्वथैव आचारस्य पालनं विधेयमिति विषये लिखितमस्ति। आचारम् अधिकृत्य कृतो ग्रन्थः आचारिकम् इति व्युत्पत्तिः। अतः अत्र नाटके आचार्यलिखितेन स्वल्पमति आचारहीनं अनुशासनहीनं, मर्यादाहीनं कार्यं विहितं, अनुमतिं विना अग्रजस्य उपवनस्य फलभक्षणं विहितम्। तस्य कृते स स्वयं राजसमक्षं दण्डं याचते, दण्डितो भवति च।

तथैव नाटकानां प्रकाशनाय कृतभूरिपरिश्रमाय प्रा.डा. विष्णुप्रसादशर्म-देवकोटावराय एवञ्च प्रा. रामहरिदाहालवराय प्रा.डा.मुकुन्दलामिछाने-महोदयाय च हार्दं धन्यवादं कृतज्ञताञ्च प्रकटयामि। अथ च नाटकस्य अध्ययनं, संशोधनं, समीक्षां च कृतवान् प्रा.डा. नूरापतिपोखेलः। एतस्य भूरिपरिश्रमस्य कृते अस्मै विद्वद्वराय कृतज्ञतामाभारञ्च समर्पयामि। स्वयञ्च कर्मफलम् इति एकविंशति लघुनाटकानि विरचय्य नाट्यसाहित्य विवृद्धये भूरिश्रमः कुर्वाणः संस्थायाः सदस्यसचिवः प्रा.डा. नवराजकट्टेलोऽपि धन्यवादार्हः, अस्यैव सदस्यसचिवस्य सक्रियतायां नाटकानां लेखनं, सङ्कलनं, सम्पादनं, प्रकाशनञ्च सम्भवम्, अनेनैव विदुषः पौनःपुन्यं निगद्य निगद्य रचनाः सङ्कलिता। एवञ्चास्य सङ्ग्रहस्य प्रकाशनाय संयोजिताः अन्ये च संस्कृतप्रेमिणः धन्यवादार्हाः सन्ति। जयतु संस्कृतम्।

अध्यक्षः

डा. बद्रीपोखेलः

जयतु संस्कृतम्

अनामनगरम्, काष्ठमण्डपम्- ३२।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाटकचतुष्टयीपर्यालोचनम्

प्रा. नुरापतिपोखरेलः

दृश्यश्रव्यभेदेने द्विधा विभक्तयोः काव्ययोरन्यतमं दृश्यकाव्यम्। तच्च काव्यमभिनयप्रधानत्वादभिनेयकाव्यम्, अनुकर्तर्यनुकार्यरूपारोपणाच्च रूपकपदवाच्यम्। नाटकञ्च रूपकेष्वन्यतमं दृश्यकाव्यम्। विशेषलक्षणं विना रूपकाण्युपरूपकाणि च नाटकवद्भवन्ति। यथा- नाटकं ख्यातवृत्तं भवति चेद् प्रकरणं कल्पितवृत्तमयं भवति। काव्यसामान्यलक्षणेन सह दृश्यकाव्येषु नाट्यशास्त्रप्रतिपादितानां नियमानां पालनमप्यावश्यकम्।

आधुनिकसमये नाटकपदेनाभिनेयं सकलमपि काव्यं बुध्यते। प्राच्यकाव्यशास्त्रे तदर्थे रूपकपदं व्यवह्रियते। पुनश्चाधुनिकनाटकानि गद्यमयानि, पद्यमयानि, गेयानि वोपलभ्यन्ते, संस्कृतनाटकानि तु गद्यपद्योभयरूपाणि। इत्थं संस्कृतरूपकाण्यान्तरविषयं लक्ष्यीकृत्य वर्गीकृतानि दृश्यन्ते चेदाधुनिकनाटकानि संरचनां लयं च लक्ष्यीकृत्य पूर्णाङ्कमेकाङ्कमिति गद्यनाटकं पद्यनाटकं गेयनाटकञ्चेति द्विधा त्रिधा वा वर्गीकृतानि लभ्यन्ते। संस्कृतरूपकाणान्तु काचिद् भिन्नैव स्वीया सरणी। तामेव सरणीमनुसृत्य वत्सगोत्रीयेण रामहरिदाहालनाम्ना विदुषा गुरुकुलचर्यम्, आचारिकम्, सत्प्रभावम्, दृष्टिसृष्टि चेति चत्वानि नाटकानि प्रणीतानि।

प्रथमं खलु नाटकं गुरुकुलचर्यम्। नाटकेऽस्मिन् षडङ्का विद्यन्ते। जिज्ञासवो वटवः कथं गुरुकुलं प्रवशन्ति, कथं वाभिभावकाः स्वसन्ततिं गुरुकुलं प्रापयन्ति, शिक्षालये गुरुकुले कृतप्रवेशा वटवः कथं वाचारप्रधानां शिक्षामर्जयन्ति, शिक्षार्जनानन्तरं कथञ्च दीक्षिता जायन्त इति गुरुकुलसम्बद्धाः सर्वेऽपि विषया अत्र निरूपिताः सन्ति। देवघट्टस्थगुरुकुलं मनसि निधाय पौरस्त्यकाव्येषु पुराणादिषु च वर्णितं गुरुकुलमहिमानं स्मारं स्मारं कविरत्र गुरुकुलचर्यां निरूपयति। गुरुकुलरीतेः समग्रतायाः निरूपणं गुरुकुलदेयाचारादिशिक्षायाः प्रतिपादनं च कवेरत्र लक्ष्यम्। अस्मान्नाटकाद्गुरुकुलानां लक्ष्यम्, गुरूणां गुरुता, अन्तेवासिष्वावश्यका नम्रातादयो गुणाश्च प्रकटीभवन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयमाचारिकं नाटकं सप्तसु अङ्केषु विभक्तमस्ति। तत्र सप्तमोऽङ्को दृश्यद्वये विभक्तोऽस्ति चेदन्ये सर्वेऽप्यङ्का दृश्यविभागरहिताः। बाहुदानदीतटस्थस्वस्वाश्रमनिवासिनोः स्मृतिशास्त्रकारयोः शङ्खलिखितयोरितिवृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति। स्मृतिशास्त्रप्रयोजकयोस्तयोः शङ्खोऽग्रजश्चेल्लिखितोऽनुजः। कदाचिदग्रजाश्रमं प्राप्तो लिखितस्तदनुज्ञां विनैव तदुद्यानस्थमाम्रफलं भक्षयति। ज्ञातवृत्तान्तः शङ्खो लिखितस्य तत्कृत्यं चौर्यं मनुते। दण्डार्हत्वाद् दण्डप्राप्तये तं राज्ञः सुद्युम्नस्य समीपं प्रेषयति। राजधर्मं पालयन् सुद्युम्नस्तस्य पाणिद्वयं छेदयति। दण्डप्राप्त्यनन्तरमग्रजेन सहैव प्रातःकृत्यसम्पादनाय बाहुदां प्राप्तस्य लिखितस्य शङ्खतपःप्रभावेण सूर्यनारायणकृपया च पाणिद्वयं रोहति। आख्यानमिदं महाभारतस्य शान्तिपर्वणि राजधर्मपालनस्याऽऽवश्यकताख्यापनाय प्रसङ्गत उद्धृतमस्ति। इदमेवाख्यानमुपजीव्य दाहालेन स्वप्रतिभया नाटकमिदं प्रणीतम्। आचारस्य महिमप्रदर्शनमेव नाटकनिर्मातुरुद्देश्यम्। एतदर्थमेव नाटकनामाचारिकं विहितम्। सर्वैरेव स्वस्वाचारः पालनीयः। स्मृतिकार एव स्वाचारं न पालयति चेदन्ये कथं पालयेयुरिति स्मृतिकारस्य शङ्खस्य धारणा। पुनश्चोपजीव्ये स्वधर्माचरणेन राज्ञः, दण्डग्रहणेन च लिखतस्य सद्गतिर्निर्दिष्टास्ति।

तृतीयं नाटकं सत्प्रभावम्। आदिकाव्यस्य रामायणस्य निर्मातुर्वाल्मीकेः प्रथितं पूर्ववृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति। वाल्मीकीये हि रामायणे वाल्मीकिरात्मानं प्रचेतसो दशमपुत्रत्वेन परिचाययति। आदिकाव्यानन्तरं लिखितेषु कतिपयेषु रामायणेषु काव्येषु च रत्नाकरनाम्ना प्रथितो दस्युरेव देवर्षेर्नारदाद् विपरीताक्षरं रामनाममन्त्रमासाद्य तमेव मन्त्रं जपन् तपसा वाल्मीकित्वमवाप रामायणञ्च रचयामासेति तदितिवृत्तमुपलभ्यते। तदेव प्रथितमितिवृत्तमुपजीव्य प्रणीतमिदं नाटकं सप्तभिरङ्कैः समन्वितमस्ति। सत्सङ्गत्या दुर्जनोऽपि सज्जनो जायत इति प्रतिपादनमेव नाटकस्यास्य लक्ष्यम्। न केवलं साधारणा एव जनाः, परं कदाचारपरायणा अपि जना सत्सङ्गतिप्रभावेण स्वजीवनं सफलीकर्तुं परोपकारं च विदधातुं प्रभवन्तीति वाल्मीकेर्दृष्टान्तेन प्रदर्श्यते।

चतुर्थं दृष्टिसृष्टिनाटकम्। यस्य यादृशी दृष्टिः (धारणा) स तादृशमेव जगत् पश्यतीति शीर्षकतात्पर्यम्। महाभारतप्रमुखचरितानां कौरवपाण्डवानां गुरुकुलाध्ययनकालिकमितिवृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति। अत्र षडङ्का

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यन्ते चेदङ्गाश्च विभिन्नेषु दृश्येषु विभक्ताः सन्ति । अत्र सत्पक्षस्य प्रतिनिधिः पाण्डुतनयो युधिष्ठिरः, असत्पक्षस्य प्रतिनिधिर्दुर्योधनः । युधिष्ठिरो भार्तृणां मेलनं कामयते चेद् दुर्योधनः सदैव पाण्डवैः सह वैरं विधत्ते । धर्मात्मजो युधिष्ठिरः स्वदृष्ट्यनुसारं सकलमपि जगत् सद्भिः प्राणिभिः पूर्णं पश्यति चेत् पाण्डवैः सह बद्धवैरो दुर्भावनाकलुषहृदयो दुर्योधनः स्वदृष्ट्यनुसारमेव निखिलमपि भुवनतलं दुर्जनैर्व्याप्तं विलोकयति । न केऽपि पदार्था जना वा स्वभावतो हेया ग्राह्या वा, जनानां दृष्टिरेव तान् हेयान् ग्राह्यान् वा सम्पदयतीति नाटकनिर्मातुस्तात्पर्यम् ।

उल्लिखितानां चतुर्णामेव नाटकानां प्रणेता नेपालसंस्कृतविश्वविद्यालयान्तर्गतस्य वाल्मीकिविद्यापीठस्याऽध्यापकचरः प्रा. रामहरिदाहालः । आजीवनमेव कृतसंस्कृतसाहित्याध्यापनेन, सदाचारादिशिक्षाप्रदानेन स्वान्तेवासिनां सन्मार्गप्रदर्शकेन, वाग्देवतासमाराधनैकलक्ष्येण, 'गतो मदीयो ननु कुत्र देशः' इत्यादिकाव्यनिचयनिर्मात्रा, मर्यादापुरुषोत्तमस्य भगवतो रामचन्द्रस्येतिवृत्तमवलम्ब्य 'अवधेशचरितम्' इति संस्कृतभाषानिबद्ध-महाकाव्य¬प्रणयनसंलग्नेन लब्धसारस्वतकृपाप्रसादेन समादरणीयेन गुरुणा रामहरिणा प्रणीतानि नाटकानीमानि नूनं काव्यतत्त्वविलसितानि नाट्यशास्त्रमर्यादानिबद्धानि च । इमानि नाटकानि मूलतः पौरस्त्यनाट्यशास्त्रनिर्दिष्टां सरणीमवलब्य प्रणीतानि ।

सर्वेष्वेव नाटकेषु प्रथितमितिवृत्तं विद्यते । प्रस्तावनया आरब्धेषु नाटकेषु सर्वत्र नान्दीपाठः, प्रस्तावनायां निर्दिष्टानां पात्राणामेव प्रयोगः, तत्र प्ररोचनायाः सन्निवेशः, अङ्कान्ते पात्राणां बहिर्गमनम्, नाटकान्ते भरतवाक्यम्, सुखान्तता चेति पौरस्त्यनाट्यशास्त्रप्रतिपादितानि नियमान्यत्र पालितानि सन्ति । अङ्कानां गद्यपद्यमयतापि सर्वत्र दृश्यते । शास्त्रनिर्दिष्टेषु सम्बोधनादिषु, क्रियापदप्रयोगादिषु च सावधानतावलिम्बितास्ति । सूक्ष्मदृष्ट्या विलोकिते पञ्चसन्धीनां प्रयोगोऽपि प्राप्यते । स्त्रीपात्रादिषु प्राकृतभाषायाः प्रयोगस्तु नैवात्रास्ति विहितः । नेपालदेशे प्रणीतेषु नाटकेषु छविलालसूरिप्रभृतीनां कतिपयानामेव नाटककाराणां नाटकेष्वेव प्राकृतभाषायाः प्रयोगः प्राप्यते । नेदानीं प्राकृतभाषाप्रयोगो नाटकेष्वपेक्ष्यत इति परम्परया ज्ञायते । न चैतावता नाट्यशास्त्रनियमानामुल्लङ्घनं जायते । सर्वेषामेव नियमानामक्षरशः पालनन्तु नानिवार्यमिति सन्ध्यङ्गानां सन्निवेशस्तु रसाभिव्यक्त्यपेक्षयैव विधेयः, न शास्त्रनिर्वहणेच्छया विधेय इति व्याहरतानन्दवर्धनेनापि सङ्केतितमेव ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पौरस्त्यनाट्यशास्त्रमवलम्ब्य प्रणीतेष्वपि रामहरेर्नाटकेष्वाधुनिकनाटकाध्ययनस्य प्रभावोऽपि दृश्यते। अङ्कादौ समयनिर्देशनाद्याग्रहस्तस्य प्रमाणम्। अङ्कान्तर्दृश्यानां सन्निवेशोऽप्याधुनिकनाटकाध्ययनजन्यः प्रभाव एव। तेनैवात्र लेखकेन विष्कम्भकप्रवेशकादीनां प्रयोगेऽभिरुचिर्नैव प्रदर्शिता। शास्त्रानुकूलेष्वप्येषु नाटकेषु नाट्यकलायाः पूर्णतः परिष्कारो नानुभूयते, परमिदानीन्तनसंस्कृतनाटकप्रणेतृषु नाटककारः स्पृहणीयः सफलश्च दृश्यते।

नाटककारो रामहरिर्मूलतः शास्त्रीयछन्दोबद्धानां पद्यानां रचयिता। 'जयतु संस्कृतम्' इति संस्थया यदा सर्वेभ्यो विद्वद्भ्यो रूपकानाम् (एकाङ्कानां पूर्णाङ्कानां चाभिनेयकाव्यानाम) प्रणयनाय प्रेरणा दत्ता तदैवानेनापि बहूनि रूपकाणि प्रणीतानि। तेषु 'पुनर्जीवनम्' नवम्यां कक्षायाम्, 'कर्मसिद्धिः' चैकादश्यां कक्षायां पाठ्यांशत्वेन निर्धारिते स्तः। चत्वारि (पूर्णाङ्कानि) नाटकानीदानीमुत्प्रेरकयैव 'जयतु संस्कृतम्' इति संस्थया प्रकाश्यमानानि सन्ति। एतदर्थमियं संस्था, अस्याः संस्थायाः सञ्चालकाः सर्वेऽपि महानुभावा धन्यवादार्हाः। सविश्वासमस्याः संस्थायाः सञ्चालकैर्नाटकावलोकनाय, भूमिकालेखनाय च योऽवसरः प्रदत्तस्तदर्थं ते सर्वेऽपि साधुवादेनाभिन्दनीयाः। अस्याः संस्थाया लक्ष्यपूर्तिः स्यात्, नैपालकसंस्कृतवाङ्मयस्य विकासोऽप्युल्लेखनीयः स्यादित्यहं कामये।

नाटककर्तू रामहरेर्भाषा सरला प्रवाहमयी च विद्यते। सा च सरलता पद्येष्वपि विलसति। अस्मादेव कारणात् पद्येभ्योऽपि गद्यकाव्यादिव सहजतयैवार्थोऽवबुध्यते। लयमेव पुरःकुर्वता लेखकेन कुत्रचिद्धतवृत्तापि नैवापसारिता। पद्यकाव्यलेखकतयास्य नाटकेषु पद्यानां बाहुल्यं दृश्यते। विशेषेणेषा स्थितिः सत्प्रभावनाटके दृश्यते। राजशेखरप्रणीतानि नाटकान्यपि पद्यबाहुल्यात् श्रव्यकाव्यानीव प्रतीयन्ते। क्वचित् सहजतयाप्येषा स्थितिर्जायते, परं तन्न पाठकहृदयमुद्वेजयति। उपमादीनामलङ्काराणां रमणीयः सन्निवेशो रामहरेः प्रशस्यः पक्षः। काव्यशास्त्रमर्मज्ञतयैवानेन रसभाववक्रोक्तिप्रभृतीनां काव्यतत्त्वानामप्यौचित्यपूर्णः सन्निवेशो विहितोऽस्ति। अभिनेयतां लक्ष्यीकृत्यैव गद्येषु स्थाने स्थाने सन्धीनां प्रयोगोऽपि नैव विहितोऽस्ति। सम्पादनक्रमे स्वल्पपदानां सन्धिर्विहितोऽस्ति। समग्रतया लेखकस्येयमलङ्कृता प्रसादगुणमयी च शैली पाठकमनोरञ्जयितुं क्षमा। नाटकानीमान्यभिनेयानि च सन्ति।

॥इति॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरोवाक्

ध्वनीगुणीभूतव्यङ्ग्यत्वेन द्विधा निर्धारितस्य चमत्कारप्राणभूतस्य वाक्यकदम्बस्य काव्यस्य दृश्यश्रव्यत्वभेदद्वयञ्च कृत्वा चातुर्विध्यं काव्यं निर्धारितमस्ति पौरस्त्यवाङ्मये। वस्तुतो ध्वनेर्गुणीभूतस्य चान्योन्यसङ्करसंसृष्ट्याऽनन्तानन्तभेदेषु भवितुं शक्तेश्चापि चातुर्विध्यं सर्वसम्मतं व्यावहारिकदृष्ट्या। तत्र दृश्यं दर्शनार्हं सामाजिकेषु सद्यः प्रभावसर्जनक्षमतायाः कारणात् प्रथमं परिगणितम्। द्रष्टुं शक्यं दृश्यमिति व्युत्पत्तौ सत्यामपि एतत् पठ्यं, श्रव्यं दृश्यञ्चानुभूयते। पठ्यकाव्यापेक्षया दृश्यकाव्यस्य महत्त्वं प्रथमतश्चर्चितं विश्वनाथेन दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतमित्युदीर्य। दृश्ये मानवीयानुभूतिः सुस्पष्टं फलितेव विभाव्यते। समाजस्य वस्तुस्थितेश्चित्रणमभिनयमाध्यमाद् विहितं विलोक्यान्तर्मनसि स्वस्यैव मनः संवेगानां प्रस्तुतिर्भूयमानाऽस्तीत्याकलयति सामाजिकः। दृश्यकाव्यं नृत्यगीतसङ्गीतसंवादानां बाहुल्येन प्रयोगात् सातिशयं प्रीतिदम्। कीर्तिस्तु प्रीत्याविर्भवति। प्रथमस्थानं प्रीतिरेव काव्ये। समाजिकप्रीतिततः, स्वस्यापि प्रीतिः, समाजे स्वस्यापि सत्त्वात्। लोकरञ्जनाय प्रयतमानस्य कवेर्धर्मार्थकामहेतोर्नाट्यविधायाः प्रथममुद्देश्यं समाजस्य प्रीतिरेव भवितुमर्हति। समाजस्योत्थानमेव। तत एव ते आकल्पं जयन्ति जीवन्ति च यशःशरीरेण। ध्वनिकृदाह– जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः। नास्ति येषां यशः काव्ये जरामरणजं भयमिति।

नाट्यस्य मूलं वेदा एव – जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च। यजुर्वेदादभिनयान् रसानाथर्वणादपि इति भरतवचनमत्र प्रमाणम्। दशरूपककृतोवचनमपि नाट्यस्य वेदमूलकत्वं साधयति। यथा–

उद्धृत्योद्धृत्य सारं यमखिलनिगमानाट्यवेदं विरिञ्चि–

श्चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः।

इति निगद्य दशरूपककृता चास्य वेदमूलकत्वं संसाध्य महत्त्वमुपरिकृतम्। यच्च नाट्यं वेदवद् महत्त्वाधयितया नाट्यवेदनाम्ना प्रथितं वर्तते। वैदिकसंवादतो नाट्यजगति संवादसर्जनं स्वाभाविकम्। तच्च पाणिनेः समयादपि पूर्वम्। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोरिति ससूत्रोल्लेखनान्नाट्यसूत्रप्रणयनस्य तन्माध्यमेन नाट्यकलायाः शुभारभणस्य च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दर्शनाद् विद्यैषा प्राक्तनी। रामायण–महाभारतकालेषु राजवर्गेण नृत्याभिननयानामायोजनं मुहुर्मुहुर्विधीयमानमासीदिति तत्तत्समयवद्धग्रन्था अत्र प्रमाणभूताः सन्ति। भाससौमिलककालिदासाश्वघोषादीनां समयतः प्रभावशालितया नाटकनाटिकाः सृष्टा अलभ्यन्ते। नाटकान्तं कवित्वम्, आनन्दनिष्यन्दिषु रूपकेषु काव्येषु नाटकं रम्यम्, चमत्कारैकप्राणा रसाः इत्यादिसूक्तानि नाट्यविधायाः सर्वोपरिमहत्त्वं सूचयन्ति।

नैपालकपरम्परायां नाट्यविधा

इन्द्रयात्राया अवसरे दिनाष्टकं यावद् राक्षसनृत्यम् (लाखेनाच) कुमारीभैरवरथयोः परिक्रमणं विष्णोर्दशानां प्रमुखावताराणामभिनयप्रदर्शनमेवामादीनि सांस्कृतिकप्रदर्शनानि प्रदर्श्य नाट्यविधायाः संरक्षणं काष्ठमण्डपोपत्यकावासिभिर्विहितं दृश्यते। यक्षमल्ल–रणमल्ल–जगत्ज्योतिर्मल्ल–भूपतीन्द्रमल्लप्रभृतयो मल्लराजाः संस्कृते नाटकानि विलिख्य प्रदर्श्य च संस्कृतसाहित्यस्योत्थाने महद् योगं दत्तवन्त इति नास्त्यविदितं विदुषाम्। इदानीं प्रदर्श्यमानानि चलचित्राण्यपि नाटकस्यैव रूपान्तराणि केवलं तत्र वैद्युतप्रविधिः प्रयुक्तोऽस्ति येन दृश्यानि विस्मयावहानि सम्पत्स्यन्ते। अतः कथयितुं शक्यते यद् नाट्यविधा सार्वकालिकी अमरविधाऽस्ति मनस्तोषिणी। इदानीमपि सततं नाटकानि प्रदर्शितानि दृश्यन्ते प्रेक्षालयेष्वन्यत्र च। तत्र सांस्कृतिकसंस्थान–प्रज्ञाप्रतिष्ठानेऽग्रगण्ये। सडकनाटकाभिधान्यपि प्रदर्श्यमानानि सन्तीति नाट्यस्य सर्वोपरिता सिद्ध्यति।

नाट्यस्य सर्वोपरिताया आधारः

क) समाजस्याचरवेशभाषासंस्कृतिव्यवहाराणां यथार्थतया चित्रणम् = अवस्थानुकारः।

ख) गीतनृत्यसङ्गीतानां प्रयोगादधिकमनोरञ्जनकता।

ग) मञ्चे संवादस्य रुचिकरप्रस्तुत्या स्वीयकंथनमुदीरितमिव सन्तोषः।

घ) तात्कालिकोद्योगवीरता–समाजोत्थान–युद्ध–
शान्त्यादीनामुल्लेखनादितिहासज्ञानेन साकं स्वसम्पतायां गर्वानुभूतिः।

ङ) भयकोपहर्षोत्साह-करुणाविस्मयादीनांमानवीयमनःसंवेगानां कमनीय-काव्यामाध्यमात् प्रस्फुटीकरणम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च) विभावादीनां साधरणीकरणाद् व्यक्तित्वक्षमतादीनां सामञ्जस्येन सार्वकालिकतया, सार्वजनीनतया च घटनानामन्तर्मनसि सञ्चरणात् सुखदुःखतः परस्यालौकिकानन्दस्य सततमनुभवनम्।

छ) आनन्दस्य न जातु विच्छेदः।

ज) अभिनयदर्शनानुपदमेव झटिति परानन्दप्राप्तिः।

झ) राष्ट्रसेवा–परोपकारिता–दुर्भावनात्याग–सुभवावृद्धिरित्यादिबोधः।

एवमेवं बहुश आधारा लभ्यन्ते नाट्यस्य सार्वजनीनसार्व-कालिकानन्दप्राप्तौ।

नाटकरचनाया उद्देश्यम्

शिक्षायां गुरुकुलीयानुशासनपद्धतिर्निंतरामुपयुक्ता दृश्यते। तत्र च विशेषतो माध्यमिकशिक्षायाम्। गुरुकुलीयापद्धतौ प्रवर्तितानां प्रातः शय्यात्यादारभ्य शौचस्नानजपसम्पादनपूर्वकमध्ययनतत्परतायाः शिष्यस्य गुरुजनेष्वादरस्य गुरोः शिष्यवर्गे स्नेहस्य भोजनशुद्धतायाः मनोयोगपूर्वकं पठनपाठनयोः, वादविवादसाहित्यिकप्रतियोगितयोः, क्रीडायाश्च समयबद्धतयाऽऽयोजनस्येति क्रियाकलापानां संस्थातगतविद्यालयेषु सामुदयिकविद्यालयेषु च समावेशनमवश्यमपि शिक्षायाः स्तरविकासाय हितकरं सेत्स्यतीति द्योतनाय गुरुकुलचर्यमिति पूर्णाङ्कीयं रूपकमुपस्थापितं वर्तते। एवञ्च समाजे, प्रशासने च वर्धमानामुच्छृङ्खलप्रवृत्तिं लक्ष्यीकृत्य प्रवृत्तिरेषा महती हानिकरी व्यक्तिराष्ट्रसमाजानां कृते इति प्रदर्शनमाचारिकरूपकस्योद्देश्यम्। अग्रजस्य वाटिकायां फलितमाम्रफलं भ्रात्रा भक्षितम्, भक्षणात् प्रागनुमतिर्न गृहीतेति दोषे भ्रातुर्भुजयुगलकर्तनं कारयित्वाऽग्रजेन दण्डो दापित इति घटना कियती निर्दयात्मिकेति चिन्त्यते। कीदृशोऽग्रजोऽस्ति यो हि भ्रातरं कठोरातिकठोरं दण्डं दापयति स्वल्पतरापराधे इति। परमत्र दण्डे कठोरतया परिचालिते सत्येव समाजे सुव्यवस्था स्थिरायते इत्यपि न विस्मर्तव्यं भवति। पुरा यथा निष्पक्षतया राजपुरुषात् सर्वसाधारणजनपर्यन्तं समानो दण्डः प्रदीयते स्म, येन समाजे सुव्यवस्था स्थापिताऽसीत्। इदानीं मानवाधिकारः, वाक्स्वतन्त्रता, नैसर्गिकाधिकारश्चेति नामसु यथाविधा उच्छृङ्खलगतिविधयो जायमानाः सन्ति। तत्र प्रमुखकारणं दण्डहीनता, उत पूर्वदण्डस्याप्रदानमेव। दण्डे पुस्कारे च पक्षपातो यत्र तद् राज्यं दुर्बलायते। राज्यं प्रति जनतायाः संरक्षकत्वविश्वासश्छिद्यते। तथा माऽभूदिति सन्देशमाचारिकरूपकेण प्रवाहयितुमिच्छति रूपककृत्। सत्प्रभावमित्यत्र सत्सङ्गतेर्महत्त्वं चर्चितम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्सङ्गतिः कथय किं न करोति पुंसामितिवद् देवर्षेः क्षणिकसम्पर्कात् प्रथिततरो दस्युरपि ब्रह्मर्षित्वं प्राप। दृश्यन्ते च सत्सङ्गत्याः परमपदभाजो ध्रुवबलिप्रह्लादादयः। तत्र दस्योर्ब्रह्मर्षित्वप्राप्तौ नेपालावनौ तपश्चरणमपि प्रथमाधारः। यत एषावनिस्तयोयोगततन्त्रमन्त्राणामाधारस्थलम्। व्यक्तेरारभ्य समाजस्ततः समग्रराष्ट्रं सदाचरणात् प्रभावितं विकसितञ्च भवति चेत् कदाचरणाद् विनष्टम्। एतत् प्रदर्शनं सत्प्रभावानाटकस्योद्देश्यम्। दृष्टिसृष्टिनाटके दृष्ट्यनुसारेण सृष्टिर्भवति, सद्विचारेण सभ्यतासृष्टिः, कुविचारेण सम्पताक्षयश्चेति प्रदर्शनपूर्वकं परहितसम्पादनायानुकूलचिन्तनाय च प्रेरितं वेविद्यते।

साहित्यस्य पौरस्त्यमान्यतामाधृत्य नाटककृता नाटकानि लिखितानि सन्ति। मान्यतेयमास्माकीना सम्पत् पद्धतिश्च। यथासम्भवं नाटकेषु तत्परिपालितमित्यसौ मनुते। नाटकानि शिक्षाप्रदात्युद्देश्यमूलकानि च सन्तीति असौ विभावयति। सन्दर्भेऽस्मिन्नुचितपरामर्शाः प्राप्स्यन्त एवेत्यसौ विश्वसिति।

एतदीयनाटकचतुष्टयस्याध्ययनं, संशोधनं, समीक्षाञ्च भूरिश्रमेण कृतवते प्राध्यापकवराय नुरापतिपोखरेलमहाभागाय सविशेषं कृतज्ञतां व्याहरामि। नाटकलेखनाय मुहुर्मुहुः प्रेरयन् संस्कृतनेपालीसाहित्यसर्जने लब्धाधिकारो जयतु संस्कृतमिति संस्थायाः सदस्यसचिवः प्राध्यापको डा.नवराजकट्टेलश्च धन्यवादार्होऽस्ति, अनेन संस्कृतरचनायां विधीयमानां प्रेरणां न जातुचिदपि विस्मरति चेतः।

जयतु संस्कृतमिति संस्था संस्कृतप्रशिक्षण–संस्कृत–सम्भाषण–कविगोष्ठीसञ्चालन–नाटकमञ्चन–कृतिप्रकाशनादौ चिराय सततं संलग्ना जायमानास्तीति संस्कृतवाङ्मयसेविनां प्रमोदावाहः पक्षः। अनया संस्थया नेदीयसि समये लघुनाटकानि बृहदाकारकाणि नाटकानि च प्रकाश्यमानानि सन्तीति बोधनान्तरं बृहदाकारं नाटकचतुष्टयं प्रस्तुतमस्ति तत्परतामालक्ष्य जयतु संस्कृतं संस्थायै तत्रानवरतं कार्यरतेभ्यः अध्यक्षोपाध्यक्षसदस्यसचिवेभ्योऽन्येभ्यः सदस्येभ्यश्च भूरिशः साधुवादान् व्याहृत्येत्यादानीं स्ववचः संक्षिपामि।

प्रा. रामहरिदाहालः

दिनाङ्काः २०८१/१२/चैत्रशुक्लद्वादशी

कलङ्की, काष्ठमण्डपः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दृष्टिसृष्टिनाटकम्

(हस्तिनापुरस्य राजसभाकक्षः)

पात्रपरिचय :

पितामहः- भीष्मेत्युपनाम । देवव्रतः मूलनाम कुरुवंशस्य राजकुमाराणां पितामहः ।

कुलगुरुः- राजकुमाराणां कुलगुरुः, कृपाचार्य इति नाम ।

युधिष्ठिरः- कुन्त्याः पाण्डोश्च जेष्ठतनयः ।

कुन्ती- पाण्डोः भार्या । युधिष्ठिरादीनां माता ।

भीमः- कुन्त्याः मध्यमपुत्रः । अर्जुनः- कुन्त्याः तृतीयपुत्रः ।

कुमाराः- हस्तिनापुरस्य राजकुमाराः । राजा- धृतराष्ट्रः ।

विदुरः- हस्तिनापुरस्य महामन्त्री । दुर्योधनः- धृतराष्ट्रस्य ज्येष्ठपुत्र ।

दुश्शासनः- दुर्योधनभ्राता । शकुनिः- दुर्योधनादीनां मातुलः ।

प्रथमोऽङ्कः

प्रेम्णो मूल्यं तितीर्षुः पशुपतिरददादर्धदेहं प्रियायै
स्वार्धं लक्ष्मीशतुष्ट्यै निगमगतरहस्यञ्च योऽदाद् मुनिभ्यः ।
इत्थं सर्वस्वदाता सकलजनहितं सर्वदा सन्दधानः
पायात् संसारदावादतुलितमहिमश्चन्द्रगङ्गाधरो वः ॥

नान्द्यन्ते

सूत्रधारः- अलं विस्तरेण । (नेपथ्याभिमुखं निरीक्ष्य) आर्ये ! यदि नेपथ्यविधानं पर्यवसितं तदिहागम्यताम् ।

नटी- (प्रविश्य) आर्यपुत्र ! इयमागतास्मि । आज्ञापयतु किमिह सम्पादनीयम् ।

सूत्रधारः- समाजोऽसौ शान्तिकामी । अनेन कोलाहलशृङ्खला बहुधा दृष्टाऽनुभूता च । तज्जनभावनामाकलय्य शान्तिगीतिर्गीयताम् ।

नटी- यदार्यपुत्र आज्ञापयति । श्रूयताम्-

शान्तितः सम्भवा स्थायिनी मित्रता ।
शान्तितो दूरतां याति भो शत्रुता ॥
शान्तितो मानसे तृप्तिरुत्पद्यते ।
कर्ममार्गेऽटितुं प्रेरणा जायते ॥
एष बन्धुर्मदीयोऽस्ति कल्याणकृ-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्नैष बन्धुर्मदीयोऽस्ति दुर्भावभृत् ।
एवमेवं विवादेन किं लभ्यते
मेलनाच्छत्वरं शत्रुता क्षीयते ।
वैरतो वैरता वर्धते निश्चयं
वर्धते दारुतो वह्निज्वाला भृशम् ।
क्षुद्रकामे विवादेन किं लभ्यते
शान्तितो जीवने किं न वाऽऽसाद्यते ॥

सूत्रधारः- आर्ये ! सुमधुरं गीतम् । गम्भीरविषयोऽभिव्यक्तः । उचितमेव यत् केवलं विवादेन जीवनं नीरसं भवति, विकासस्य गतिरपि अवरुध्यते । उचितविषयेऽपि अधिकविवादनमश्रेयस्करं भवति चेदनुचितविषये विवदनन्तु सर्वथा हानिकरम् ।

नटी- आर्यपुत्र ! दुःखस्य विषयोऽयं यत् केचनाऽन्यस्य हानिमपेक्ष्यविवदन्ते । कथं कदा वा तेषां मतिः निर्मला स्यात् !

सूत्रधारः- आर्ये ! कामादिविषयानेव सर्वस्वं मन्वाना एवमाचरन्ति । व्यक्तेर्दृष्ट्यनुसारेण प्राकृतिकसृष्टिरुत्तमाधमा वा प्रतिभाति ।

नटी- आर्यपुत्र ! साधूक्तम् । स्वभावानुसारेणैवान्यान् पश्यति जनः ।

सूत्रधारः- आर्ये ! अलं बह्वालापेन । इयं हि भुजबलार्जितसकलभुवोऽतिरथिभीष्मसंरक्षिता सम्राजो धृतराष्ट्रस्य रसभाववित् परिषद् । अत्र वत्सगोत्रीयकवे रामहरेर्दृष्टिसृष्टिनामधेयेन नाटकेन परितोषयितव्यम् ।

नटी- आर्यपुत्र ! भासकालिदासभवभूत्यादीनां नाटकामृतसिन्धुमवगाह्य आस्वादमग्नेयं परिषद् नवीननाटकेन कियान् परितृप्तः स्यात् ?

सूत्रधारः- आर्ये नैवं वाच्यम् । आधुनिकनाटकानि सामयिकविषयवस्तुग्रथितानि भवन्ति । तत्र कविश्च कथं परिषदं तोषये, कथं चाश्वादमूलान् नूतनविषयान् प्रस्तवानीत्यत्र दत्तावधानो दृश्यते ।

सूत्रधारः- आर्यपुत्र ! अवगताऽस्मि । यथासम्भवं परिषदं तोषयितुं प्रयतिष्ये । (कर्णौ दत्त्वा) कथमत्र श्रूयते कलकलः ।

सूत्रधारः- कुरुवंशाङ्कुराणां राजकुमाराणां क्रीडनावधौ विवाद उद्भूत इव प्रतीयते । तथा हि-

शान्ताः सुवाचः कतिचित् कुमारा
दुर्भाषिणोऽशान्ततराश्च केचित् ।
कथं विभक्ताः किल बाल्यकालात्
स्थितः स्वभावो नहि दुर्निवार्यः ।

॥ इति निष्क्रान्तौ ॥

॥ इति प्रस्तावना ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमं दृश्यम्

पाण्डवभवनम्

(ततः प्रविशति रोषावेशेनाऽऽलोहितनयनो भीमः)

भीमः- अम्ब ! अम्ब ! कुत्राऽसि ।

कुन्ती- (ससंभ्रममागत्य) वत्स ! कथमशान्तः प्रतिभासि । किमापतितम् ?

भीमः- (मुष्टिमुत्तोल्य) अम्ब ! दुर्योधनमहं ताडयामि । सततमेव नस्तिरस्कृत्य दुर्भाषते ।

कुन्ती- शान्तं पापम् ! वत्स ! रोषं मा कुरु, स तवैव भ्राताऽस्ति ।

भीमः- दुर्योधनः पूज्यानग्रजानस्मान् च सततमवनुते । स वक्ति- यूयं वनवासिनः, युष्मदीयं स्थानं वनं वर्तते । अत्र किमर्थमायाता इति ।

कुन्ती- वत्स ! युष्माकं पञ्चानामेव भ्रातॄणां जन्म वनेऽभवदिति तस्माऽऽशयः स्यात् । कथं क्षुभ्यसि, वन एव जातोऽसि ।

भीमः- अम्ब ! न तावन्मात्रम् । दुर्योधनो राजप्रासादोऽस्माकं कौरवाणामेव । राज्यमप्यस्माकमेव, न वनवासिनां युष्माकमिति जल्पति ।

कुन्ती- वत्स भीम ! इदानीं दुर्योधनोऽल्पवया वर्तते । केन सह कदा किं कथनीयमिति न जानाति । अतस्तस्मिन् त्वया कोपो न धर्तव्यः ।

युधिष्ठिरः- (सत्वरमेत्य) श्रद्धामूर्तिरम्बा सत्यमुपदिशति । कोपाद् मतिर्भ्रश्यते । कार्याकार्यविचारणा लुप्यति । भ्रात ! एतदर्थं भ्रातरं दुर्योधनं प्रति तव कोपदृष्टिरनुचिताऽस्ति ।

भीमः- (ईषद् रोषं प्रकट्य) अम्बा अग्रजश्चोभावेव मां गर्हयतः । कटुभाषी दुर्योधनो दोषी न, केवलमहं दोषी वर्ते ।

कुन्ती- वत्स ! मया न तथोक्तम् । दुर्योधनः प्रासादेऽजायत, अवर्धत च । यूयं च वनेऽजायन्त। (काकुस्वरेण) तेन पितृव्यमहाराजो न दृष्टः । वयमपि पूर्वं न दृष्टाः । अतस्तस्य मनसि तथा भ्रम उद्भुतः स्यात् !

युधिष्ठिरः- भ्रातः ! आदरणीयाऽम्बा यन्निर्दिशति, तदस्माभिर्मनसा वचसा कर्मणा च परिपालनीयं भवति । एतदेव नः कर्तव्यम् । अम्बा दुर्योधनाय कोपं न धर्तुं प्रेरयति चेत् त्वया तद्वचः सोढव्यम् ।

भीमः- (सरोषम्) कथं सहे, कथं सहे ज्येष्ठभ्रातः ! स यत् किमपि वक्तुं वाऽऽचरितुं स्वतन्त्रः । अहं मूकवत् किमप्यश्रुत्य, हस्तौ पादौ प्रबाध्य च तिष्ठानि ! एष एव युवयोरादेशोऽस्ति किमु !

युधिष्ठिरः- भ्रातर्नैवं वद ।

कस्मिन् कार्येऽनुष्ठिते साधुता स्यात्
कस्मिन् कार्ये न कृते साधुता स्यात् ।
रोषाविष्टो नैव वेत्ता मनुष्यः
रोषो वैरी मानवानां मनस्थः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किञ्च-
रोषाधीनो मानवः कुत्र कस्मै
किं किं वाच्यं किन्न वाच्यं मनुष्यैः ।
एवं ज्ञातुं सक्षमो नैव भूयात्
किं वा कार्यं रोषतो निर्मलं स्यात् ॥

भीमः- (सदैन्यम्) भवन्तो मद्वचनं न शृण्वन्ति । नाहमत्र तिष्ठामि ।

(इति निष्कामति)

द्वितीयं दृश्यम्

पूर्वाह्णः । राजसभा ।

(नेपथ्ये)

भो राजकुमाराः ! प्रथितपशाः, सोमवंशावतंसः, सत्यव्रती देवव्रतो युष्मान् दिदृक्षति । तच्छीघ्रं राजसभां प्रविशत ।

युधिष्ठिरः- (आकर्ण्य सहर्षम्) सर्वथा सर्वदा चास्माकं हितकामी पितामहोऽस्मान् शुभाचरणप्रभृतिशिक्षां दित्सति । भ्राता भीमः कुत्र गतः स्यात् ? (भीममकारयितुं सहदेवमादिशति)

सहदेवः- (भीमेन सह प्रविश्य) पूज्यभ्रातः ! आवामागतौ स्वः ।

कुन्ती- भो वत्साः ! यूयं गुरुजनसविधे शान्ताः संयमिनश्च भूत्वा तिष्ठत । गुरुजनानामुपदेशमवधानतया मनसि धरत ।

भीमः- केवलं भ्रातैव न, माताऽपि अस्मानेवाननुशिष्टानिति मनुते । दुर्योधनादीन् न किञ्चिद् वक्ति ।

युधिष्ठिरः- भ्रातर्नैवं वाच्यम् । महाराजः पिता, राजमहिषी माता च एतानाचारविषयं शिक्षयिष्यत एव । त्वं कथं सहसा विरुणत्सि । नैतद् युक्तम् ।

भीमः- अधुना यावत् तैर्न शिक्षितं भवेत् किम् ? कुलकलङ्कास्ते गुरुवचनं न शृण्वन्ति, आचरणस्य वार्ता दूरे एव ।

अर्जुनः- भ्रातृवर्य ! वादस्य सीमा न भवति । अथ च वर्धितवादो विवादे परिणमितुमपि शक्ष्यति । अतो न विवद्य गुरुवरसन्निधौ द्रुतं याम इति विनिवेदयामि ।

युधिष्ठिरः- भ्रातः ! सत्यमुक्तं भवता । यतः-
न जातु दृष्टा किल वादसीमा
विवद्य लाभो न हि कश्चनोऽस्ति ।
एवं विदित्वा न विरोधनीयं
क्षमाऽस्ति पुंसां परमं हि वित्तम् ॥
तद् साधयामो गुरुसंविधे ।

(इति निष्कामति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयं दृश्यम्

॥ हस्तिनापुरस्य राजसभाकक्षः ॥

(ततः प्रविशन्ति पितामहो देवव्रतः (भीष्मोपाहः) कुलगुरुः कृपाचार्यः, धार्तराष्ट्रादुर्योधनप्रभृतयः, पाण्डवा युधिष्ठिरप्रभृतयः कुमाराश्च ।

सर्वे कुमाराः (उत्थाय साञ्जलि) पूज्यतमान् पितामहान् कुलगुरून् च प्रणमामः । (साञ्जलि प्रणमन्ति)

पितामहः- (दक्षिणहस्तमुपरिकृत्य) आयुष्मन्तो भवत वत्साः ॥

कुलगुरुः- यशस्विनो भवत कुमाराः ।

पितामहः- आस्यताम्, वयं पौरवाः । पुरुप्रभृतयो नः पूर्वपुरुषाः । ते हि चक्रवर्तिनः करदीकृतभूपालाः समुद्रान्तपृथ्वीकाऽभवन् । तत्र ययातिपुरुभरताऽलर्कगाधिशन्तनवोऽनन्याः । राजकुमारा यूयमस्मिन्नेव विख्याततमे सोमवंशे उदभूताः स्थ । अतो युष्माभिश्चरित्रं शौर्यम्, अध्ययनञ्च प्रवर्ध्य स्वेष्वपि तद्वद्गुणाधानाय प्रयतनीयम् ।

युधिष्ठिरः- पितामह ! वयमनुशिष्टा भूत्वाऽध्ययनादौ तत्पराः स्मः ।

भीष्मः- (साङ्गुलिनिर्देशनम्) अत्र भवान् एतद्राजवंशस्य कुलगुरुरस्ति । श्रुतिस्मृतिविदाचारवाञ्च वर्तते । अस्मद्भागधेयेन धनुर्वेदवेत्ता, दिव्यास्त्राणां सन्धाननिपुणश्च मिलितः । इदानीं कुमाराणां शिक्षणाय अलमत्रभवान् । पश्चादावश्यकतायामनुभूतायामन्य आचार्यो नियोक्ष्यते । (कुमारान् लक्ष्यीकृत्य) यूयमनुशिष्टा भूत्वा मनोयोगपूर्वकं गुरोः सकाशादधीध्वम् । गुरूणामाज्ञापालनम्, सखीनां मध्ये मेलधरणम्, यथासमयं शय्यात्यागः स्नानम्, विहरणमभ्यवहरणम्, क्रीडनं पठनं शरसन्धानं लक्ष्यप्रहरणम् जलप्लवनमश्वारोहणञ्च विधत्त ।

कुमारः- पितामहानामादेशमवश्यं परिपालयिष्यामः ।

भीमः- भो पितामह ! दुर्योधनः सर्वथाऽस्मान् विरुणद्धि । क्रीडावसरे दुर्वचोभिराक्षिपति, ताडयत्यपि ।

दुर्योधनः- पितामह ! भीमोऽपि मुष्टीमुष्टि प्रहर्तुमग्रे सरति । अहमस्य कृत्यं न सहे ।

भीमः- (उत्थाय) अहमपि न सहे । (युधिष्ठिर उत्थितं भ्रातरमुपवेशयति)

पितामहः- वत्साः, इदानीमपि यूयं विवदथ, आक्षिपथ च, नैतद् युक्तम् । यदीत्थं विवदथ तर्हि शिक्षायां कथं योग्या भविष्यथ । विवादे एव समयो व्यत्तेति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुर्योधनः- पितामह ! विवादस्य कारणं भीमोऽस्ति ।

पितामहः- वत्स दुर्योधन ! युधिष्ठिरादयस्तव आदरणीया भ्रातरः । स्वर्गवासिनो महाराजस्य पाण्डोः सुताः राजकुमारा एव । एते नान्ये । वयं सर्वे परिवारसदस्याः । एतान् नाक्षिप । वत्स भीम ! त्वमपि कलहं न प्रवर्ध्य मेलभावेन पठ, क्रीड च ।

(दुर्योधनो भीमश्च ओष्ठदशनपूर्वकं मुष्टिमुत्तोलयतः)

युधिष्ठिरः- पितामह ! वयं गुरुकुलमर्यादां साधु परिपाल्याऽध्येतुं प्रतिज्ञाबद्धाः स्मः ।

कुलगुरुः- भो वत्साः ! भवतामेष कालो गुरोरन्तिके स्थित्वाऽध्ययनस्य । अध्ययनेनैव मानवः परिपक्वो भवति । अध्ययनेनैव जनः कर्तव्याकर्तव्ये बोद्धुं सुकृत्यमाचरितुं दुष्कृत्यं निरस्तुञ्च प्रभवति । अहं विश्वसिमि यूयमाचारपालनपूर्वकमधीत्य योग्या भविष्यथेति । तथा हि-

चलति समयवेगो न प्रतीक्ष्यैव कञ्चित्
स मनुज इह मान्यो योऽस्ति वेलानुसारी ।
समयगतिमजानन्नालसो वर्तते यः
पठितजनसभायां नादरं प्राप्नुयात् सः ॥

भीष्मः- भो वत्साः, शृणुत-

सभयो बलवानहर्निशं
समयः खादति स्थावरं चरम् ।
समयं परिपाल्य यश्चरेत्
सफलोऽस्यादवनौ स संभवेत् ।

अपि च-

अधुना किल दीर्घसूत्रतां
परिहायैव गुरोः सकाशतः ।
अधिकं परिवित्त बोधनं
मतिमान् सँल्लभते जनादरम् ॥

अतः आदिशामि वः आचारपालनं विधाय पठतेति ।

कुमाराः- एवमेव क्रियते पितामहः ।

इति निष्क्रान्ताः सर्वे । इति प्रथमोऽङ्कः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ द्वितीयोऽङ्कः

प्रथमं दृश्यम्

उत्तरपूर्वाह्णः । अध्ययनशाला

(ततः प्रविशति कुलगुरुः कृपाचार्यः, हस्त्यश्वरथशिक्षकाः, धार्तराष्ट्राः, पाण्डवाश्च कुमाराः)

कुमाराः- (उत्थाय) शिक्षादातृभ्य आचार्येभ्यो नमः ।

कुलगुरुः, अन्ये उपाध्यायाश्च- स्वस्ति कुमारेभ्यः । आस्यतां स्वं स्वमासनम् ।

कुलगुरुः- भो कुमाराः ! विद्यार्जनाय भवन्त उत्सुकाः सन्तीत्यालक्ष्य स्वागतं वच्मि । भवद्भिः पूर्वपुरुषाणां दिगन्तव्यापि यशःश्रुतमेव स्यात् । ते विद्यया शौर्येण, प्रजापालनकर्मणा च यशस्विनोऽभवन् । भवद्भिरपि राजोचितविषयानधीत्य, शस्त्रास्त्रकौशलमधिगम्य, शौर्येण भूमण्डलभूपान् वशीकृत्य च पूर्वजवद् यशःप्राप्तये प्रयतनीयम् । अवगतम्?

कुमारः- अवगतं कुलगुरो ! अवगतम् ।

कुलगुरुः- विद्यार्जनावधौ भवद्भिराचरणीयं कर्तव्यजातं निर्दिशामि ।

कुमारः- अवहिताः स्मः।

कुलगुरुः- भवतां प्रथमं कर्तव्यमस्ति- समयपालनम् शय्यात्याग-शौचापादन-कक्षाध्ययनानाम्, कोष्ठाऽध्ययनस्य, हस्त्यश्वविहार-रथचालनयोः, लक्ष्यभेदनस्य, जलविहारस्य, भोजन-शयनयोश्च समयः निश्चेतव्यः । अत्र ईषदपि विपर्ययता न विधातव्या । अन्यथा अध्ययनं विकृतं स्यात् । भवद्भिरेतदवगतम् ।

कुमारः- अवगतं गुरो ! समयतालिकायाः अनुसारेणैव वयमध्ययनादिकार्यजातं प्रपूरयिष्यामः । अपरं किं कर्तव्यं स्यात् ?

कुलगुरुः- अपरं कर्तव्यमस्ति चरित्ररक्षणम् । तत्रादौ ब्रह्मचर्यपालनम् ।

कुमारः- कथं ब्रह्मचर्यं पालनीयं गुरो !

कुलगुरुः- ब्रह्मचर्यपालनावधौ मनसि कामवासनाया रोधनमावश्यकम् । भोजनपरिधानयोः, दर्शनविहरणयोश्च संयमो धर्तव्यः । अध्ययनस्य विकासाय स्वास्थ्यस्य रक्षणाय च ब्रह्मचर्यं परिपालनीयमेव ।

कुमारः- अपरं किं कर्तव्यम् ?.

कुलगुरुः- अपरं कर्तव्यमस्ति गुर्वादेशपालनम् । आहूतो विद्यार्थी गुरुसमीपे स्थित्वाऽधीयेत । गुरुणाऽध्यापितपाठे दत्तदृष्टिर्दत्तावधानश्च पठेत् । पृच्छावसरे वदेदपि । आलस्यहीनः स्फूर्तः शुचिश्च भूत्वा पठेत् । दुर्जनसङ्गतिमधुमांसलेपनोच्छिष्टभोजनानि त्यजेत् । स्त्रीभिः संभाषणशयने, अश्लीलभाषणश्च परिहरेत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुमारः- अन्यदपि श्रोतुमिच्छामः गुरो !

कुलगुरुः- शृणुत, अन्यत् कर्तव्यमस्ति स्वाध्ययनम्। द्विजातिभिर्वेदाध्ययनं न त्याज्यम्। वेदपाठः प्रातः शुभकारकः। स्वशाखाया वेदपाठी द्विजः पितॄन् देवाँश्च सततं तर्पयति पूजयति च। स विविधयज्ञानां फलं प्राप्नोति। अध्ययनमेव धर्मः। तद्धि तपः। वेदपाठमनु धर्मशास्त्रेतिहासगाथाविद्याः पठेत्। भवन्तः क्षत्रियकुमाराः, अतो भवद्भिर्धनुर्वेदः सरहस्यमध्ययनीयः। धनुर्वेदान्तर्गतस्य अस्त्रग्रामस्य प्रायोगिकशिक्षणावसरे सततमभ्यसनंम्, धैर्यम्, गाम्भीर्यम्, दृष्टिस्थैर्यञ्च आवश्यकानि भवन्ति।

कुमारः- कुलगुरो ! भावत्कं प्रत्येकं निर्देशनं मनोयोगपूर्वकं परिपालयिष्यामः।

कुलगुरुः- एतदेवापेक्षितं कुमारेभ्यः। किञ्चिदवशिष्टं वच्मि। श्रूयताम्-

कुमारः- अविहिताः स्मः कुलगुरो !

कुलगुरुः- कुमाराः ! चरित्ररक्षणस्य आभ्यन्तरे सत्यपालनमपि महत्त्वपूर्णः पक्षोऽस्ति। सत्यं सर्वत्र कर्मसु अवलम्बनीयं भवति। यथा- सत्यं भाषणीयम्, सत्यं चिन्तनीयम्, सत्यं व्यवहरणीयञ्च।असत्याश्रयणात् कदाचित् कश्चन लाभो भवेच्चेदपि स स्वल्पकालिक एव। जनता असत्यभाषिणं निन्दति। तं न विश्वसिति। अत एव ऋषिभिर्गीतं **सत्यमेव जयते नानृतम**। तथा हि-

आश्रित्य सत्यं विदधीत कार्यं
सत्येन कार्याणि फलन्ति पुंसः।
उदेति चित्तेऽतुलनीयशान्ति-
र्या जीवनं प्रीणयतीह शश्वत्॥

अपरं महत्त्वमपि शृणु
कर्तव्यनिष्ठस्य हि सत्यवक्तु-
र्भवन्ति वश्या उभयत्र लोकाः।
पराजयस्तस्य न जातु भावी
प्राप्नोति किं वा न हि सत्यसेवी॥

कदापि सत्याश्रयिणः कुकृत्यं
दम्भं छलं नाऽथ समाचरन्ति।
अतः कुतश्चिन्नभयं लभन्ते,
धीराः कथं कुत्र भयं लभन्ते॥

कुमारः- गुरुवर ! सत्यमेतत्। सत्यमार्गं न त्यजाम इति प्रतिजानीमहे।

कुलगुरुः- कुमाराः ! भवद्भिर्मधुरं हितं मितञ्च वक्तव्यम्। परवनितासु मातृबुद्धिर्धर्तव्या। मनसि कामभावना नोद्भावनीया। असहायानां विपन्नानाञ्च संरक्षणं विधातव्यम्। सखीनां मध्ये सदैव मेलभावो धर्तव्यश्च। तथाहि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काककोकिलौ कृष्णवर्णकौ
तुल्यशक्तिकौ पक्षिणावुभौ ।
किन्तु प्रीतिदः कोकिलो मन्यते
मिष्टभाषिता कारणं वर्तते ॥

तिक्तभाषिणं को नु संस्मरेद्
मिष्टभाषिणं को नु विस्मरेत् ।
ब्रूत वत्सका मिष्टभाषणं
कस्य न प्रियं मिष्टभाषणम् ॥

दैहिकी पुष्टता मानसी धीरता
जायते ब्रह्मचर्यस्य संपालनात् ।
ज्ञानलब्धौ परं ब्रह्मचर्यं बलं
को हि धीरस्त्यजेद् ब्रह्मचर्यं धनम् ॥

अपरञ्च शृणुत कुमाराः
सन्ततं स्फूर्तिरायाति देहेऽखिले
दूरतो यान्ति तन्द्राप्रमादादयः ।
निर्मला धीः सदा जायते मानसे
किं न वा जायते ब्रह्मचर्ये स्थिरे ॥

अन्यच्च

देशसंरक्षणं दीनसंरक्षणं
सैन्यशस्त्रास्त्रकोषादिसंवर्धनम् ।
क्षत्रियाणामिदं वित्त कृत्यं महत्
क्षत्रियः शोभते लोककार्यं दधत् ॥
किमधिकम् ? कुमारा एतदनुशासनं पालयिष्यन्तीति
कुलगुरुर्विश्वसिति ।

कुमारः- निर्दिष्टमनुशासनं परिपाल्यते गुरुवर !

कुलगुरुः- साधु ! सम्प्रति गम्यतां धनुःकौशलार्जनाय ।

कुमारः- यथाज्ञापयति गुरुवर ।

इति निष्क्रान्ताः

द्वितीयं दृश्यम्

मध्याह्णकालः । प्रासादकक्ष ।

(ततो दुर्योधनदुश्शासनादयो राजकुमाराः प्रविशन्ति)

दुर्योधनः- पितामहः, कुलगुरुः, पितृव्यश्च केवलमुपदेष्टुं प्रभवन्ति । जराजीर्णानामन्यत् किं कार्यं भवति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुश्शासनः- भ्रातः ! सत्यमुक्तम् । मध्येभाषणमेव अहमुत्थातुमना आसम् । अन्ये किङ्कथयेयुरिति विचार्यैवावसम् ।

दुर्योधनः- श्वः परश्वश्च इमे स्वान् बहु मन्वाना इत्यमेवोपदिशेयुः ।

कुमाराः- ज्येष्ठभ्रात ! इत्थमेव कुर्युः ।

दुर्योधनः- वृद्धा गलोत्फुल्लनं कुर्युरेव । वयं रुच्यनुसारेण करिष्यामः । कस्तेषां बलीपलितानां परिदेवनं शृणुयात् ! (हसति)

कुमारः- कथं शृणुमस्तेषां विलपनम् । (हसन्ति)

(नेपथ्ये)

(प्रज्ञाभुजबलार्जितवसुमतीमण्डलः कुरुकुलावतंसः सम्राट् धृतराष्ट्रः सतीशिरोरत्नायमाना, क्षमामूर्तिर्देवी गान्धारी, महामन्त्री विदुरश्चागच्छन्ति । तत्स्वागताय सज्जा भवत ।

कुन्ती- पुत्रकाः ! पिता महाराजो देवी माता पितृव्यो विदुरश्च सभामलङ्कुर्वाणः सन्ति । एतेषां दर्शनार्थं द्रुतं यात । अहमपि सहैव यामि ।

युधिष्ठिरः- मात ! यदा ज्ञापयति भवती । मान्यानां चरणस्पर्शनमस्माकं कर्तव्यमेव ।

कुन्ती- अथ किम् ।

कुमारः- साधयामस्तावत् ।

कुरुकुमाराः- (आकर्ण्य) पिता महाराजः, माता महाराज्ञी च राजसभां प्रविशन्तौ स्त इति विभाव्यते । तद् पित्रोर्दर्शनाय यामः ।

इति निष्क्रान्ताः

(ततः प्रविशन्ति राजा धृतराष्ट्रः, देवी गान्धारी, राज्ञः परामर्शदोमहामन्त्री विदुरः, स्वर्गीयमहाराजस्य पट्टमहिषी कुन्ती, चामरहस्ता राजपरिचारिकाश्च)

कुमारः- स्वस्ति महाराजाय राजमात्रे कनिष्ठमात्रे कुन्त्यै च पितृव्याय महामन्त्रिणे च ।

धृतराष्ट्रो गान्धारी कुन्ती च- आयुष्मन्तो भवत वत्साः ।

विदुरः- यशस्विनो भवत कुमाराः ।

राजा- पुत्रकाः, अस्मत्पूर्वपुरुषा यशस्विनो धीराः, बहुज्ञाश्चावर्तन्त । वशीकृतभुवनमण्डलानां तेषां यशःपताका साम्प्रतमपि दिग्दिगन्तेषु दोधूयमाना वर्तते ।

कुमारः- अस्माभिर्बहुधा श्रुतम् । पूर्वपुरुषाणां यशः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(इति निष्क्रान्ताः)

राजा- वत्साः ! यूयं तेषामेव भरतपुरुकुरुशन्तनुप्रभृतीनां वंशजाः । अतस्तेषां देशनिष्ठां, विजयोत्साहच्च स्मारं स्मारं तद्वदेव विपुलयशस उपार्जनाय, जनापेक्षायाः पूरणाय, देशविजयाय च प्रयत्नं युष्मत्कर्तव्यमस्ति । तदर्थं मनोयोगपूर्वकमधीत, शस्त्रास्त्रप्रयोगकौशलमर्जयत च । (महामात्यं विदुरमुद्दिश्य) विदुर ! त्वं शास्त्रविद्, राजनीतिकुशलश्चासि, अस्मत्कथने किमवशिष्टमस्ति, तदुपदिश ।

विदुरः- कुमाराः ! श्रद्धेयमहाराजेन यदुक्तं तत् पर्याप्तमेव । तथापि महाराजाज्ञया किञ्चिद् वच्मि ।

सर्वे शास्त्रं ज्ञानलाभाय पठ्यं
तावन्मात्राद् नैव ज्ञानं प्रपूर्णम् ।
सत्यः पन्था नैव त्याज्यो मनुष्यैः
सत्यादीशो लभ्यतेऽत्रैव धीरैः ॥

सत्यं वाच्यं कामकोपौ निरस्यौ
दीनानाथा रक्षणीयाश्च नित्यम् ।
न्याय्यो मार्गो वत्सकैः पालनीयः
सत्याशिक्षाऽऽचारमूलाऽस्ति वित्त ॥ ।

कीर्तिं प्रापुः पूर्वजाः किं विधाय
कस्मात् कार्याद् भद्रता स्याज्जनाय ।
एवं चित्तं यतनीयञ्च तत्र
कार्यं कुर्वन्नेव जीवेद् मनुष्यः ॥

धैर्यं शौर्यं क्षत्रियैर्वर्धनीये
र्नायो गावो वेदविप्राश्च रक्ष्याः ।
मन्त्रो गूढः सर्वथा संविधेयो
देशो भूत्या सर्वदा वर्धनीयः ॥

किमधिकम्, कुमारैरेतच्छ्रुतं दृष्टमपि । तथापि महाराजस्यादेशेन, महामन्त्रितया अभिभावकतया चोक्तम् । एष विश्वसिति- कुमारैरेषा आचारसरणिः परिपाल्यत एवेति ।

राजा- वत्सकाः ! पूज्यपितामहेन आदरणीयेन कुलगुरुणा च शिक्षार्जनसम्बन्धे भूयोभूयः यूयमुपदिष्टाः स्थ । अधुना महामात्यो विदुरश्चोपदिष्टवान् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यूयं स्वयमपि विचारयितुं शक्नुथ । सोमवंश्यानां पूर्वपुरुषाणां यशो येन उज्ज्वलायते तथाऽऽचरत । तथा हि-

यतःफलं स्वादु मिलेत् क्रिया सा
शान्तिर्यतः कर्म तदेव कार्यम् ।
विजित्य पूर्वान् यशसा श्रुतेन
सुकार्यतः शान्तिफलं लभध्वम् ॥

कुमारः- तात ! सर्वथा सुकार्याय प्रतिजानीमहे ।

राजा- वयं भवद्भ्यएतदेव आशास्महे । (महामात्यं विलोक्य) विदुर ! सम्प्रति सभायाः समापनमुद्घोषय ।

विदुरः- यदाज्ञापयति महाराज ! (उत्थाय) महाराजस्याज्ञया कुमाराणां शस्त्रास्त्राभ्यसनबेला संभूतेति अनुमीय च सम्प्रति सभैषा विसर्जिता भवति ।

इति निष्क्रान्ताः सर्वे

इति द्वितीयोऽङ्कः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ तृतीयोऽङ्कः

अपराह्णः । मुक्तरङ्गशाला ।

(नेपथ्ये)

भो कुमाराः, कुलगुरुप्रभृतय आचार्यः प्रतीक्ष्यमाणाः सन्ति, तच्छीघ्रं शस्त्रास्त्रप्रयोगाभ्यासाय भवद्भिरुपस्थापितव्यम् ।

कुमाराः- (श्रुतमभिनीय) अहो गुरुसन्निधौ प्राप्तुं चिरायिता वयम् । आचार्याः शस्त्रास्त्रप्रयोगशिक्षयोपस्थिताः सन्तीति प्रतीयते । तदा विलम्बितमेव यामः ।

(इति प्रतिष्ठन्ते)

(रङ्गशाला- शस्त्रास्त्राभ्यसनकक्षः । वामदक्षिणपार्श्वयोर्दर्शककक्षः । भित्तौ बहुबर्तुलरेखावृत्तं दृश्यते । रेखावृत्तस्य मध्ये रक्तमस्यङ्कितो बिन्दुस्तथा बाह्यरेखासु प्रतिचतुरङ्गुलं हरिन्मणिमस्यङ्कितानि लक्ष्यचिह्नानि सन्ति । एवं वस्त्रनिर्मिता रक्तबिन्द्वङ्किता मानवप्रतिमाः, पशुपक्षिप्रतिमाश्च सूत्रे लम्बिताः सन्ति । कुत्रचिद् गदाप्रशिक्षणक्रमे आवश्यक्यो मृत्तुषसिकताभरिता बृहत्यः पोटलिकाः, खड्गप्रहरणाय आवश्यकाः गोलकाष्ठखण्डाश्च वर्तन्ते ।

एवञ्च पारेशतं धनूंषि, इषुधयः, कवचानि, कुन्ताः, शूलानि, छुरिकाः, यष्टयः, खड्गभल्लगदायुधानि सन्ति । रिपुवर्गात् स्वान् गोपायितुं खाताः सुरक्षणगर्ताश्च विलोक्यते ।

ततः प्रविशन्ति आचार्याः कुलगुरुप्रभृतयस्तदनु कुरुपाण्डुकुमाराश्च । आचार्या निर्धारितं स्वं स्वमासनमलङ्कुर्वन्ति ।)

कुमाराः- अभिवादयामः कुलगुरुप्रभृतीनाचार्यान् ।

कुलगुरुः अन्ये आचार्याश्च- यशस्विनो भवत वत्साः ।

कुमाराः- अनुगृहीताः स्मः ।

कुलगुरुः- कुमाराः ! क्षत्रियैः शस्त्रास्त्रप्रयोगे निपुणताऽर्जनीया भवति । शस्त्रास्त्रजातं क्षत्रियाणां भूषणं प्रजारक्षणसाधनञ्च । परं यथासम्भवं शस्त्रास्त्राणि न प्रयोज्यानि । सामादिभिरुपायैरेव समस्या समाधातव्या । कठिनतमस्थितौ आपतितायामेव शस्त्रास्त्राणि प्रयोक्तव्यानि । तथा हि-

धैर्यं बुद्धिमतां बलं प्रथमकं शौर्यं द्वितीयं बलं
सान्त्वं दानमयो विभेदकरणं तार्तीयकं सम्बलम् ।
शस्त्रास्त्रं चरमं बलं परमिदं नो युज्यते सर्वदा
सामाद्यैः सफलापितो नरपतिः सम्भाव्यते सर्वथा ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शस्त्रास्त्राणि धरन्ति क्षत्रियजना नित्यं प्रहाराय न
प्राप्ते भीषणसङ्कटे ह्यगतितो योज्यानि वेध्यानि च ।
शत्रोस्तस्करदस्युतो जनपदं दीनाँश्च संरक्षितुं
शस्त्रास्त्राण्युपयुञ्जते नृपतयः शस्त्रं हि तुर्यं बलम् ॥

कुमारः- आचार्याणां निर्देशनं सर्वथा पालयिष्यामः ।

कुलगुरुः- कुमाराः ! रङ्गभुवमायुधानि च प्रणमत ।

तथाहि

अङ्कं प्रदाय जननीव धरा वदान्या
क्रीडोत्प्लवप्रधनकर्मसु नः प्रयुङ्क्ते ।
रङ्गावनिः समरकौशलमिच्छुकानां
स्वप्राणवद् धनमहो बहुमूल्यमास्ते ।

अपिच-

शत्रोर्देशं स्वाः प्रजाः रक्षितुं वा
धर्तव्यं स्यात् क्षत्रियैरस्त्रजातम् ।
अस्त्राभावे तस्करा वर्धितः स्यु-
र्नोपेक्ष्यं वै तेन शस्त्रास्त्रजातम् ॥

एवञ्च-

शस्त्रं पूता वेदवाणी द्विजानां
शौर्यं शस्त्रास्त्रं बलं क्षत्रियाणाम् ।
वाणिज्याद्यं वैश्यवर्गस्य शस्त्रं
किं वा शस्त्रास्त्रस्य न स्यान्महत्त्वम् ॥

तस्माद् वत्साः, सायुधां रङ्गभूमिं सादरं प्रणमत-

कुमारः- भो रङ्गभूः वयं कुमाराः शस्त्रास्त्राभ्यसनाय भवत्या प्राङ्गणं प्रयोक्तुमिच्छामः । एषा नो बाध्यता । तत् क्षमताम् । सादरं भवतीं प्रणमामः ।(आयुधजातं विलोक्य) भो आयुधानि ! अस्मन्नमनं स्वीकुरुत । वयं युद्धाभ्यासाय भावत्कं कलेवरं प्रयोक्तुं कामयामहे । तत्र क्षमाप्रदानपूर्वकं भवद्भिरस्माकमुत्साहो वर्धनीयः ।

(नेपथ्ये)

भो रक्षिणः सोमवंशाग्रणीः, अतिरथी गाङ्गेयो देवव्रतो कुमाराणां कौशलं द्रष्टुमिच्छति । तद् यात्रायै रथः सज्जीक्रियताम् ।

कुलगुरुः- (आकर्ण्य) प्रथितयशाः, धन्विनामग्रणीः पितामहः कुमाराणां कौशलं दिदृक्षुः प्रतीयते । (कुमारान् विलोक्य) भो कुमाराः ! अवधानतया कौशलं प्रदर्शयत ।

कुमारः- कुलगुरो ! एवमेव विधातुं प्रयतिष्यामहे । (मिथः सखीन् विलोक्य) वीरवरः पूज्यः पितामहः अस्मत्कौशलं दिदृक्षतीति कारणात् सावधाना भूत्वा कौशलं प्रदर्शयामः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(ततः प्रविशति राजकीयवेशे पितामहो देवव्रतः। कुलगुरुः अन्ये प्रशिक्षकाश्च पुष्पार्पणपूर्वकं तमभ्यर्थयन्ते। कुमारा अवनतशिरसा पितामहं नमन्ति। स च कुलगुरुप्रभृतीन् प्रणम्य निर्धारितमासनमलङ्करोति।)

कुलगुरुः- राज्यसंरक्षकमतिरथिनं पितामहं देवव्रतं कुमारान् किञ्चिदुपदेष्टुमनुरुणध्मि।

पितामहः- वत्साः ! समयोऽसौ युष्माकमध्ययनस्य। कालक्षेपणं न विधाय गुरोर्निर्देशनं परिपाल्य च शास्त्रस्य, शस्त्रास्त्राणाञ्च अभ्यासं वर्धयत। तथा हि-

शूरो धीरो बुद्धिमान् चैव वर्ते
किं स्यादस्त्रैर्नैव वाच्यं कदाचित्।
दूरादस्त्रे वैरिणा प्रहृते किं
किं स्यात् मत्या धैर्यतः शौर्यतश्च॥
शूरैः धीरैः क्षत्रियैर्धर्मनिष्ठैः
शस्त्रं शास्त्रं चोभयं ज्ञेयमेव।
राज्यं चौरात् तस्कराच्छत्रुवर्गाद्
रक्षन् योद्धा क्षत्रियः कीर्तिभाक् स्यात्॥

अपि च-

यस्या व्यक्तेर्निर्मला दृष्टिरस्ति
तस्याः सृष्टिर्निर्मला बोभवीति।
एवं हेतोर्द्वेषभावं विहाय
वत्सा ज्ञानं सद्गुरोरेव वित्त॥
समयं परिपाल्य सर्वदा
यतनीयं निजकार्यपूर्तये।
शुभकर्म विना जनो हि को
भवतादुन्नतिमार्गसाधकः॥

किञ्च-

अवधानतया गुरोर्वचः
श्रवणीयं मननीयमेव च।
अथ तन्नयनं क्रियापथे
घटते सत्वरमेव श्रेयसे॥

किमधिकम्। अन्यत् कुलगुरुप्रभृतयः शिक्षयिष्यन्त्येव। (विरमति)

कुलगुरुः- कुमाराः ! भवद्भिः अपराजेयधानुष्कस्य पूज्यपितामहस्य निर्देशनं श्रुतमेव। एतदनुसारेण क्षत्रियोचितमाचरणं विधाय जीवननिर्माणं क्रियत एवेति विश्वसिमि।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुमारः- कुलगुरो ! पितामहस्य गुरुपराणाञ्च निर्देशनं परिपालयिष्याम एवेति विश्वासयामः ।

कुलगुरुः- कुमाराः लक्ष्यवेधनप्रसङ्गे परिपालनीयाः कतिचन नियमाः श्रूयताम् ।

कुमारः- अवहिताः स्मः कुलगुरो !

कुलगुरुः- कुमाराः ! अग्रे लक्ष्यवेधनरेखा मनुजपशुपक्षिणाञ्च प्रतिकृतयश्च सन्ति । तत्र वेधनावधौ प्रतिपञ्चवारं चतुर्वारं वा रक्तचिह्नवेधको विशिष्टः सर्वोत्तमो वा मन्यते । वारत्रयं लक्ष्यवेधकः प्रथमः, वारद्वयं लक्ष्यवेधको द्वितीयस्तथा एकवारं लक्ष्यवेधकस्तृतीयो मन्यते । एकवारमपि लक्ष्यं बेद्धुमसमर्थः अयोग्यो मन्यते । परं तस्मै पुनः पूर्ववल्लक्ष्यवेधनाय समयः प्रदास्यते । लक्ष्यचिह्नादन्यत्र प्रहारको नाङ्कभाक् । कुमाराः अवगतम् ?

कुमारः- अवगतं गुरुवर !

कुलगुरुः- अवशिष्टकथनं श्रूयताम् ।

कुमारः- अवहिताः स्म ।

कुलगुरुः- कुमाराः ! मनुजपशुपक्षिणां प्रतिकृतिषु लक्ष्यवेधनावसरे उपरितनेषु नाभिवक्षःकर्णगलनयनललाटप्रभृतिषु निर्धारितस्थानेष्वेव लक्ष्यं बेद्धव्यम् । लक्ष्यवेधने सफलो जैत्रस्तथाऽसफलश्च्युतलक्ष्यो मन्यते । अङ्कदातारो बिन्दुवेधसंख्यायाः अनुसारेण अङ्कं ददति । श्रेणीञ्च निर्धारयन्ति । अपि नियमा अवगताः ?

कुमारः- अवगतं कुलगुरोः !

कुलगुरुः- तर्हि सम्प्रति स्वं स्वमायुधं गृहीत्वा रणकौशलं प्रदर्श्यताम् ।

कुमारः- कुलगुरो ! एवमेव विधास्यामः ।

(ततः कुमाराः स्वं स्वं शस्त्रमस्त्रं वा गृह्णन्ति । युधिष्ठिरः कुन्तम्, नकुलसहदेवौ करवालम्, भीमश्च गदां गृह्णन्ति)

दुर्योधनः- भीम ! एषा गदा मम, त्वं ग्रहीतुं न शक्नोसि ।

भीमः- दुर्योधन ! त्वदर्थमपरा गदा निर्धारिताऽस्ति ।

दुर्योधनः- एषैव गदा मह्यं रोचते । नाऽपरां गृह्णामि ।

कुलगुरुः- दुर्योधन ! त्वत्कृतेऽपरैव गदा निर्धारिताऽस्ति, गदायाः धातुमानः शक्तिश्च समाने एव । त्वमेतां गदां धर !

दुर्योधनः- नाऽहमेतां गदां धरामि ।

भीमः- नाऽहं गदामिमामर्पयामि । उभौ सङ्घर्षाय तत्परौ भवतः ।

कुलगुरुः- अभ्यासावसरे विवदनं नोचितम् । दुर्योधन ! त्वं प्रशिक्षकैर्निर्धारितामेव गदां गृहाण ।

दुर्योधनः- भीमस्य गदा गुणवती, गुर्वी च प्रतिभाति । अहं महाराजस्य ज्येष्ठः श्रेष्ठश्च सुतः । अतो न साधारणीं गदां गृह्णामि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुलगुरुः- (गदां निर्दिश्य) एषा गदाऽपि तुल्यशक्तिकैव । एतामेव गदां गृहाण । (दातुमिच्छति)

दुर्योधनः- न गृह्णामि । भीमाद् गदां छेत्तुमिच्छति ।

भीमः- गुरुजनैर्निर्णीता गदा मया धृताऽस्ति । नैतां गदां तुभ्यं प्रत्यर्पये ।

युधिष्ठिरः- (भीमान्तिकमेत्य) भ्रातः ! वयं शिक्षणायागताः । अन्यगदया च शिक्षितुं शक्यते । अत इमां गदां दुर्योधन एव गृह्णातु, न विवदस्व ।

भीमः- यदार्य आज्ञापयति । (धृतां गदां दुर्योधनायार्पयति ।)

पितामहः- (उत्थाय दुर्योधनं लक्ष्यीकृत्य) वत्स दुर्योधन ! गदाधरणसदृशि सामान्यविषयेऽपि त्वं विवदसे । एतन्नोचितम् । दृष्टिः सर्वथा निर्मला विधातव्या । दृष्ट्यनुसारेण सृष्टिर्निर्मीयते । पुष्पदृष्टौ पुष्पमेव संसारः, कण्टकदृष्टौ कण्टकमेव संसारः, इति वचः सत्यमेव । शृणु वत्स !

दृष्टिः
स्वच्छा सर्वदा संविधेया
दृष्टौ शुद्धायां जगच्छुद्धमेव ।
तुच्छे स्वार्थे मित्रतां द्राङ्निरस्य
कः स्याल्लाभो वैरभावं प्रवर्ध्य ॥
अपि च शृणु वत्साः-
रोषाल्लोभामर्षतो वा प्रमादाद्
विद्यालब्धुं शक्यते नैव वत्साः ।
एषा श्रद्धाभ्यासतो दर्पक्षत्या
लब्धुं ज्ञातुं रक्षितुं वा सुशक्या ॥

सम्प्रति यूयं शास्त्रमर्यादाम् आचार्यनिर्देशनं, समयतालिकाञ्च परिपाल्य पठिष्यथ, अभ्यसिष्यथ, मेलभावेनाग्रे चलिष्यथ चेति विश्वसिमि । इदानीमहं साधयामि ।

इति निष्क्रान्तः ॥

(नेपथ्ये धनुष्टङ्कार-कृपाणसङ्घट्टनाश्वधावन-कूर्दन-प्रहरणदिशब्दाः श्रूयन्ते । कुत्रचिज्जय, जहि, प्रहर, निपीडयश्चेति, अपरत्र म्रिये, हन्मि, न त्यज, नत्यजामीति शब्दाश्च श्रुतिपथमवतरन्ति ।अत्रान्तरे कार्यविरामसूचकः शङ्खध्वनिः श्रूयते ।)

कुलगुरुः- (प्रविश्य) कुमाराः ! भवद्भिः शस्त्रास्त्रकौशलं प्रशंसनीयमेव प्रदर्शितम् । एवं रीत्या आगामिदिनेष्वपि रणकौशलमर्जनीयम् । श्वः पुनः मेलितारः ।

इति निष्क्रान्ताः सर्वे ॥

इति तृतीयोऽङ्कः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ चतुर्थोऽङ्कः

सायम् । पाण्डवनिवासः ।

(ततः प्रविशन्ति माता कुन्ती, एतदीया युधिष्ठिरप्रभृतयः पञ्चतनयाश्च ।)

प्रथमं दृश्यम्

पाण्डवनिवासः ।

कुन्ती- पुत्राः ! कुलगुरुप्रभृतिभिराचार्यैः शस्त्रास्त्रकौशलं सम्यक् शिक्षितं स्यात् । शिक्षितान् विषयान् दत्तावधाना भूत्वा मनसि धरत ।

युधिष्ठिरः- अम्ब ! आचार्यैरध्यापितान् विषयान् यथासम्भवं न विस्मर्तुं वर्धयितुञ्च प्रयतिष्यते ।

भीमः- अम्ब ! अहं गदाप्रयोगेऽग्रणीर्भवितुमीहे । दुर्योधनोऽपि मम द्वेषाद् गदाशिक्षणे पटुतामर्जयितुमीहते ।

कुन्ती- वत्स भीम ! दुर्योधनो गदाभ्यासं वर्धयितुमिच्छति चेच्छोभनमेव । गुरोः कृपया यः कोऽपि यं कमपि विषयं शिक्षितुं प्रभवति । पुत्र ! तत्र द्वेषस्य संभावना नाऽऽकलनीया ।

भीमः- अम्ब ! दुर्योधनो मम द्वेषादेव गदायुद्धे प्रावीण्यमभिलषति । अत्र भवती सरलहृदया, अतस्तस्य कपटं न विचारयति ।

युधिष्ठिरः- दुर्योधनः कपटजालं कथं न विस्तारयेत्, तदपि अस्माभिः कपटो न परिधेयः । यदि वयमपि कपटमवलम्बामहे तर्हि तस्मिन्नस्मासु च का स्याद् भिन्नता ?

कुन्ती- पुत्र भीम ! अग्रजस्तथ्यमुद्घाटयति । कपटस्योत्तरं न कपटेन, परं माधुर्येण देयम् । नीतिविदः प्रतिपादयन्ति उपायचतुष्टये साम्नो महत्त्वमुपरि वर्तते ।

भीमः- भवन्तः साम सामेति पौनःपुण्येनोच्चारयन्ति । दुर्योधनोऽस्मान् ताडयति चेदपि हस्तौ बद्ध्वा स्थातव्यं किम् ? सदैव सरलता, सर्वत्रैव सरलता कथं संभवति ?

युधिष्ठिरः- भ्रतर्भीम ! अम्बाया आशये वैपरीत्यं मा चिन्तय । अम्बाया आशयोऽहमित्थं जानामि यत्- साम्ना साधनीये विषये दण्डादीनां प्रयोगोऽनुचितः । दण्डेन हि कलहो द्विगुणायते । वादिनि, प्रतिवादिनि चोभयत्र क्षतिर्जायते । यतः-

क्षान्त्या शान्ता दुर्हृदः संभवन्ति
क्षान्त्या तोषो मानसे जायते च ।
एवं हेतोर्नीतिकाराः क्षमायां
शान्तिं मैत्रीमुन्नतिं दृष्टवन्तः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अर्जुनः- अग्रजवर ! विवदनस्य, कलहसर्जनस्य चापेक्षया शस्त्रास्त्राणां बोधनेन प्रयोगपाटवेन च आचार्याणां मान्यानाञ्च मनोऽस्माभिर्जेतव्यम् । तथात्वे कलहं वर्धयित्वा ये केऽपि पराजिता भवेयुः । अस्माकं दृष्टिः सर्वदैव सर्वेषामेव मङ्गलं कामयमाना भवितुमर्हति ।

कुन्ती युधिष्ठिरश्च-

भ्रातः साधूक्तम् । सदाचारिभिर्भूत्वा निष्ठापूर्वकं शस्त्रास्त्राभ्यासकौशलं वर्धनीयम् ।

सर्वे- (करतलवादनपूर्वकं सहर्षम्) एतदेवोचितम्, एतदेवोचितम् ।

(नेपथ्ये)

भो कुमाराः, आचार्या निर्दिशन्ति यद् भास्करः स्वतेजोमण्डलमुपसंहरन्निव लक्ष्यते । तत् सायङ्क्रियाया निवर्तनाय प्रयतध्वम् ।

कुन्ती- सत्यमधुना सायं समयः प्राप्त इव मन्ये । तथा हि-

व्याप्तं तेजो दिशि दिशि रवेर्दृश्यते क्षीयमाणं
स्वर्णाकारं धरति जलदः कृष्णवर्णं विहाय ।
नीडं यातुं विहगततयस्त्वर्यमाणा विभान्ति,
शाकं चायं किमु गगनजञ्चेत्यभावेदयन्ति ॥

तत् सन्ध्यावन्दनाय महानसिकव्यापारनिवर्तनाय च यामि ।

इति निष्क्रामति

निष्क्रान्ताः सर्वे ॥

द्वितीयं दृश्यम्

सायम् । कौरवनिवासः ।

(ततः प्रविशन्ति दुर्योधनयुयुत्सुदुश्शासनप्रभृतयः शतं कुमाराः तेषां मातुलः शकुनिः कतिचन सुरक्षकाश्च)

दुर्योधनः- (दक्षिणहस्तमुद्यम्य) भीमः कथं स्वं न जानाति । स खलु वनवासी, अज्ञातपितृकः । अधुना वृद्धभीष्मेण राजकीयसौविध्यं दापितम्, अतोऽसौ माद्यति ।

दुश्शासनः- भ्रात अग्रज ! भीमस्य धाष्ट्र्यमक्षम्यमेव ।

शकुनिः- भागिनेय ! त्वं राजकुमार एव न, युवराजोऽप्यसि । त्वं पितुर्महाराजस्य ज्येष्ठपुत्रः । महाराजस्य सरलतामाधृत्य भीष्मेण राजकुमारवत् सौविध्यमेतेभ्यः प्रदत्तम् । वत्स भागिनेय ! एतावन्मात्रेण किमपि गतं नास्ति, मा चिन्तय ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुर्योधनः- आदरणीयमातुल ! अद्य गदायुद्धस्य धारणावसरेऽपि भीमो विवदनायोद्यतः प्रशिक्षका अपि विवादवर्धनाय तस्मै सुहृढां गदामददुः । मया तैर्निर्धारिता गदा न धृता ।

दुश्शासनः- अग्रजवरेणोचितं कृतम् । गदां छित्वा भीमस्य मदो भग्नतां नीतः ।

युयुत्सुः- अधुना केवलं गदाधरणविषय उद्भूतः । पश्चादनेके तथाविधा विषया उद्भवितुं शक्ष्यन्ति । तथाविधेषु क्षुद्रविषयेषु ध्यानं नावर्ज्य अस्माभिः पाण्डवेभ्यः अधिकं नैपुण्यमर्जनीयम् ।

शकुनिः- वत्स दुर्योधन ! त्वं राजकुमारोऽसि । त्वां विरोद्धुं न कोऽपि प्रभवति । यदि विरोधनायोत्तिष्ठति चेत् सोऽस्माकं रिपुर्मन्यते ।

अन्ये भ्रातरः- मान्य भ्रात ! सावधानतयाऽस्माभिर्व्यवहर्तव्यम् । जनमतमपि अस्मिन् सन्दर्भे विचारणीयं भवति । जनताऽस्मान् यथाधृष्टान् न पश्येत्तथा व्यवहर्तुमुपयुक्तं स्यात् ।

शकुनिः- जनमतस्य चिन्ता न विधेया । स्वभावत एव जनाः शक्तेः पूजका भवन्ति । यत्र शक्तिस्तत्र जना अनुगच्छन्ति । अधिकारप्राप्त्या शक्तिर्वर्धते । शक्त्या जनतेति कारणात् शक्तिमर्जयितुं सामदानादिभिः प्रयतनीयम् । अन्ये विषया गौणाः ।

दुर्योधनः- आदरणीयमातुल ! शक्तिप्राप्तये किं कर्तव्यम् ?

शकुनिः- भागिनेय ! प्रथमं गुरुभिः शिक्षिता विषयाः सम्यग् मननीयाः । रिपोः, अन्यस्य चापेक्षायां स्वधीता शिक्षा न्यूना न भवतु । यतो हि शैक्षिकन्यूनतायां दृष्टायामपरे उपहसन्ति ।

दुर्योधनः- मातुलवर्य ! गदायाः प्रहरणे भीमाद् न्यूनो यथा न भवेयं तथाऽभ्यस्यामि सततम् ।

शकुनिः- वत्सा ! युस्माभिः आयुधप्रहरणे दाक्ष्यमर्जनीयम् । शस्त्रास्त्रकुशलाद् जनात् चौरतस्कराः धूर्तदस्यवोऽपि पलायन्ते । रिपवोऽपि तं तिरस्कर्तुं न प्रभवन्ति ।

दुर्योधनः- मातुल ! अन्यत् किं ज्ञातव्यम् ?

शकुनिः- भागिनेय ! प्रतिपक्षस्य समक्षं मित्रवत् स्थातव्यत्, परमन्तश्छुरिका तेजनीया ।

दुर्योधनः- साधु मातुलवर ! साधु ।

शकुनिः- इदमपि शृणु-

अग्निः स्वल्पो वा भवेत् क्षीणकयो
दाहे शक्तिः संभवत्येव नूनम् ।
एवं वैरी स्वल्पकोऽसौ न चिन्त्यः
प्राप्तच्छिद्रो वंशमुन्मूलयेत् सः ॥

अन्यदपि- शत्रोर्बीजं मूलतश्छेदनीयं
बीजे शिष्टे पत्रशाखा भवन्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यावद् बीजं पत्रतां नैव गच्छेत्
तावद् बीजं वैरिणो दाहनीयम् ॥

दुश्शासनः- मातुलवर ! वयं शतं भ्रातर एकीभूय वैरिदलं वात्येव शुष्कपत्रराशिमुन्मूलयिष्यामः । कोऽपि प्रभुर्नो वैरं धर्तुम् ।

शकुनिः- वत्स ! तथा निश्चिन्तता कदापि न धार्या । पूर्वापरपरिस्थितिं विचार्येन कार्यं प्रारभणीयम् । शत्रुः क्षुद्रोऽस्तीति च न विचार्यः ।

दुर्योधनः- बुद्धिमति मातुलवरे, बलवत्सु भ्रातृषु च सत्सु कुतो भयमस्माकम् ?

शकुनिः- भगिनेय एष केवलं तव भ्रम एव । शत्रुर्बाह्यरूपेण न निरीक्षणीयः । तस्य सहयोगिनः केके कुत्र कुत्र कथंविधाश्च सन्तीत्यपि ज्ञातव्यमेव । पाष्णिग्राहिषु बलवत्सु सत्सु क्षुद्रोऽपि रिपुर्बली सम्पद्यते ।

भ्रातरः- मातुलवर ! वयं राजनीतौ शून्यायिताः स्म । भवतो बहु ज्ञातव्यभवशिष्टमस्ति ।

शकुनिः- भागिनेयाः! शृणुत । रिपोर्बलाबलं, परिस्थितिम् असावधानताञ्च विचार्य प्रहर्तव्यम् । तत्पूर्वं स्वबलं सम्यग् वर्धनीयम् । मित्रपक्षश्च सङ्घटनीयः ।

दुर्योधनः- कूटनीतौ मातुलवरं को जयेत् ?

शकुनिः- एवं भ्रमो न धर्तव्यः । वत्सा इदानीम् आचार्यप्रशिक्षकैः शिक्षिते धनुःकौशले एव ध्यानं दत्त । अहं समये समये सामदानादीनुपायान् बोधयिष्यामि । स्वः कुमाराः कन्दुकेन क्रीडितार इति श्रुतम् । तत्रापि विजयिनो भवितुं प्रयत्यताम् ।

(नेपथ्ये)

भो क्षत्रियकुमारा रात्र्याः प्रथमप्रहरः क्षीयमाणोऽस्तीति हेतोर्भवतां शयनसमय अयमिति सूच्यते । (आपूर्यमाणस्य शङ्खस्य ध्वनिः श्रूयते ।)

शकुनिः- परिचारकाः शयनवेलां सूचयन्ति । (बहिरागत्य नभो विलोक्य) निशेयं तरुणायिता प्रतीयते । तथा हि-

सुजनमन इवासावुज्ज्वलः स्मेरवर्णो
नभसि विततरश्मिर्द्योतते यामिनीशः ।
स्पुटति कुमुदिनीयं प्राप्य चन्द्रं स्मितास्यं
मनुजपशुपतङ्गा यान्ति वासाय नीडम् ॥

तत् प्रयात वत्साः स्वस्वकोष्ठेषु विश्रामार्थम् । अहमपि साधयामि ।

दुर्योधनादयः- मातुलवर ! साधयामो वयमपि ।

इति निष्क्रान्ताः सर्वे

इति चतुर्थोऽङ्कः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ पञ्चमोऽङ्कः

प्रातः । क्रीडाप्राङ्गणम् ।

प्रथमं दृश्यम्

कर्मवीरः- अद्य कुमाराणां कन्दुकक्रीडा भवतीति श्रूयते । तदर्थं चत्वरशोधनाय क्रीडाप्रशिक्षकेण निर्दिष्टोऽस्मि । एकाकिना न परिशोध्यते । भवतु, सखीं भूमिपुत्रीमाह्वयामि । भो भूमिपुत्रि ! इत आयाहि ।

भूमिपुत्री- एषा आयाता । कर्मवीर ! आज्ञापयतु किं करवाणि ।

कर्मवीरः- भूमिपुत्रि ! किं त्वया नाकर्णितं यद् कुमाराः कन्दुकं क्रीडिष्यन्तीति ।

भूमिपुत्री- आकर्णितम् । एतेन किम् ?

कर्मवीरः- किं न भवति । क्रीडायाः सारल्याय क्रीडाङ्गनं शोधनीयं वर्तते । उच्चावचभूमेः समीकरणं प्राकारस्य सुदृढीकरणञ्च विधातव्ये ।

भूमिपुत्री- शर्कराकण्टकादयश्च परिहर्तव्या भवन्ति ।

कर्मवीरः- एवम्, त्वमपि मम सहयोगिनी भव ।

भूमिपुत्री- (किञ्चिदपहस्य) मया असहयोगे विहिते त्वं किङ्करोषि ?

कर्मवीरः- संसारः सर्वथा स्वार्थी वर्तत इति विचारयामि । मम कोऽप्यात्मीयो नास्तीति वा ।

भूमिपुत्री- सहयोगे विहिते किं पारितोषिकं ददासि ?

कर्मवीरः- स्वजीवनमेव ।

भूमिपुत्री- (ईषद् हसित्वा) दक्षिणकरेण लघु ताडयति ।

कर्मवीरः- (निकटमेत्य करं ग्रहीतुमिच्छति)

भूमिपुत्री- पलायनमभिनयति ।

कर्मवीरः- (पुनराहूय) भो भूमिपुत्रि, इत आयाहि । यत्त्वं कथयसि तदेवाऽहं करोमि । मम सहयोगदा भव ।

भूमिपुत्री- मत्तः कार्यं साम्पाद्य स्वस्मिन् श्रेय आधातुमिच्छसि ।

कर्मवीरः- मैवं वद । सर्वं कार्यजातं भवत्या प्रपूरितमिति कथयिष्ये ।

भूमिपुत्री- भवतु अहमपि कार्यं करोमि । आवयोः तुल्यमेव श्रेयो मिलतु । (उभौ प्राङ्गणं सम्मार्जयतः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपथ्ये

भो, भूशोधकाः, कुमाराणां कन्दुकक्रीडनस्य अवसर उपस्थितः । क्रीडाङ्गनमार्जनं प्रपूरयत ।

उभौ- (आकर्ण्य) साधयावस्तावत् कार्यं प्रपूरितमिति सूचयितुम् ।

(इति निष्क्रान्तौ)

द्वितीयं दृश्यम्

(क्रीडाप्राङ्गणम्, यत्र प्रशिक्षकाः क्रीडकाश्च सन्ति)

प्रशिक्षकः- राजकुमाराः भवन्तः सर्वत्र क्षेत्रेषु दक्षा भवन्त्विति अस्माकं विचारो वर्तते । अश्वारोहणरथचालन-जलप्लवनादयः कला भवद्भिर्ज्ञाता एव । इदानीं कन्दुकक्रीडनस्य सम्बन्धे किञ्चिद् वच्मि । इतः पूर्वमपि अस्माकं सहकर्मिणा कन्दुकक्रीडाविषयो भवद्भ्यः प्रकाशित एव ।

कुमाराः- प्रकाशितोऽस्ति गुरुवर !

प्रशिक्षकः- अवशिष्टं श्रूयताम् ।

कुमाराः- अवहिता स्मः ।

प्रशिक्षकः- क्रीडाऽप्येकमध्ययनमेव । यया शारीरिकक्षमता मानसिकशक्तिश्च विकसिते भवतः । अनुशासनं, सामूहिककार्यसम्पादनं सङ्घटनक्षमतायाः विकासश्च वर्धिष्यन्ते । अपि बुद्धम् ।

कुमाराः- बुद्धं गुरुवर !

प्रशिक्षकः- पादकन्दुकक्रीडा एकादश, एकादशजनानां पक्षद्वयं निर्माय क्रीड्यते । तत्र पक्षद्वयेनैव स्वपक्षस्य विजयाय क्रीडितव्यम् । विजयार्थमपरपक्षस्य प्रहरण-पातन-क्षेपणप्रभृतीनि दुष्कार्याणि न विधातव्यानि । प्रहाररक्षकस्य चातुर्यं विजित्य प्रतिपक्षिणां प्रहारमवरोध्य च लक्ष्ये प्रहर्तव्यम् । सङ्घटितकार्येण अभ्यासकौशलेन च विजयो लभ्यते । इति भवद्भिर्बुद्धमेव स्यात् । दुष्परिस्थितावपि उत्साहो नैव त्याज्यः ।

सहयोगी प्रशिक्षकः- भो राजकुमाराः, भवद्भिर्विशेषतः प्रशिक्षकस्य क्रीडानियामकस्य (रेफ्री इतयस्य)च निर्देशनं परिपाल्य क्रीडितव्यम् । कुमाराणां कृते क्रीडाया महत्त्वमतुलनीयमेवाऽऽस्ते । तथाहि-

ग्रीवावक्षोदरकटिभुवां रोमतः स्वेदधारा
रोगैस्सार्धं पतति मनुजः क्रीडया स्फूर्तिमान् स्यात् ।
आशीर्षं स्यात् सबलमधिकं पादतोऽङ्गं समन्तात्
क्रीडा नित्यं भवति फलदा देहिनां कन्दुकाद्या ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपि च-

रोगी दूरं चलति पलितं सर्वथोन्मूलितं स्यात्
बाहू पादावुदरहृदये स्युर्भृशं स्वस्तिमन्ति ।
नाडीमार्गाद् वहति नितरां रक्तसञ्चारधारा
को वा लाभो न मिलति तनौ क्रीडया मानसे वा ॥

कुमाराः- गुरुवर ! भवतां निर्देशनमवश्यं परिपालयिष्यामः । कृतकृत्याः स्म गुरुवराः ।

प्रशिक्षकः- राजकुमाराः सम्प्रति भवन्तु क्रीडितुं शक्नुवन्ति । वयमाशास्महे भवन्तो दर्शकान् सन्तोषयन्त्येव ।

कुमाराः- नियमान् परिपाल्य क्रीडितुं तत्पराः स्मः ।

(इति निष्क्रान्ताः सर्वे)

तृतीयं दृश्यम्

सायम् । विश्रामकक्षः ।

(पौरद्वयस्य प्रवेशः)

प्रथमः- सखे ! भवता साम्प्रतमेव शन्तनुरङ्गशालायां कुमाराणां क्रीडा विलोकितेति श्रुतम् । कीदृशी रोमाञ्चकारिण्यासीत् सा ?

द्वितीयः- राजकर्मचारिणां पक्षतो मया क्रीडाया अवलोकनस्यावसरो लब्धः । क्रीडा रोमाञ्चकारिणी अवर्तत ।

प्रथमः- क्रीडायां जयपराजयौ स्वाभाविकावेव । को नु पक्षः कथं विजयी अभवत् ?

द्वितीयः- कुमाराणां मध्ये सौहार्दवातावरणे क्रीडा क्रीडिताऽऽसीत् । तत्र जयपराजयोरपेक्षयाऽपि क्रीडाशिक्षणस्य शारीरिकसुसङ्घटनस्य च महत्त्वं वस्तुतो विचारितं भवेत् ।

प्रथमपौरः- तथापि केन कथं लक्ष्यप्रहारः साधितः ?

द्वितीयः- क्रीडायाः प्रारम्भत एव प्रतिस्पर्धा सुदृढाऽदृश्यत । घाटिकाद्वयेऽपि कुतश्चन पक्षादपि लक्ष्यप्रहारो न साधितः । तदवसरे एव कुमारभीमेन प्रहृतः कन्दुकः प्राकाराद् बहिरपतत् ।

प्रथमः- ततः किम् ?

द्वितीयः- कन्दुकग्रहणाय कुमाराः क्रीडाङ्गनाद् बहिरायाताः । परं कन्दुकस्तत्र न दृष्टः ।

प्रथमः- कथमित्थं घटितम् ?

द्वितीयः- अन्वेषणक्रमे कन्दुको गभीरेऽन्धकूपे पतितो दृष्टः ।

प्रथमः- ततः ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयः- कुमाराः कन्दुकग्रहणाय चिरं प्रायतन्त, परं सफलता नाधिगता। विहिता सर्वेऽप्युपाया विफलापिताः।

प्रथमः- ततः?

द्वितीयः- अत्रान्तरे एकः कृशतनुः श्यामवर्णः, तिलकितभालः परिहितधौतश्च ब्राह्मण आयातः।

प्रथमः- तदनु किमभवत्?

द्वितीयः- कुमारा ब्राह्मणं पर्यवेष्टयन्।

प्रथमः- ततः?

द्वितीयः- ब्राह्मणोऽवोचत्-कुमारा ! भरतंस्यान्वये जाताः सन्तोऽपि यूयं कूपे पतितं कन्दुकमुद्धर्तुमपि न शक्नुथ। सम्प्रति पश्यत- अहमङ्गुलिमुद्रिकां कूपे क्षिपामि, तदनु मुद्रिकया सह कन्दुकमपि युगवत् कूपादुद्धरामि।

ततः कुमाराः ऊचुः- एतदेव क्रियतां ब्राह्मणवर ! वयमुत्कायिताः स्म एतद् विस्मयावहं कार्यं द्रष्टुम्। तदनु ब्राह्मणः पश्यतइत्युक्त्वा मुद्रिकां क्षियति। मुष्टिमितामिषीकामभिमन्त्रयते। तदनु स कन्दुकस्योपरि एकामिषीकां प्रक्षिपति, तदुपर्यपरां तदुपर्यपरामिति कृत्वा, मुद्रिकाया उपर्यपि तां क्रियामावर्त्य हस्तद्वयेन कन्दुकं मुद्रिकाञ्च युगपद् गृह्णाति।

प्रथमः- ततस्ततः ?

द्वितीयः- कुमारा विस्मिता अभवन्। तेऽवदन्- कथमिषीकाप्रयोगेण कन्दुको मुद्रिका च युगपद् गृहीते ! एवं विस्मितास्ते ब्राह्मणं विलोकयन्ति।

प्रथमः- ततः किमभवत् ?

द्वितीयः- ततो युधिष्ठिरदुर्योधनप्रमुखाः कुमारा अवोचन्- ब्रह्मन् अभिवादयामहे भवन्तम्। एवंविधा कला नान्यत्र दृष्टा। को भवान् ? कथमेतद् ज्ञानमधिगतम् ? वयञ्च भवन्तं किं करवामेति।

प्रथमः- ततस्ततः ?

द्वितीयः- ततो ब्राह्मणस्तानगदत्- महातेजसं भीष्ममेतद् यूयं संसूचयत, स एव मां परिचेष्यति ।तथेत्युक्त्वा कुमारा भीष्ममेतत् सूचयामासुः। स तं सस्वागतं प्रासादं नीत्वा दिव्यास्त्राचार्यमघोषयत्।

प्रथमः- एवं चेत्तर्हि राजकुमारा दिव्यास्त्राण्यपि शिक्षिष्यन्ते। एतत् पुरुवंशस्य गौरवमेव। साधयामस्तावत् कुमाराणां शस्त्रास्त्रकौशलमवलोकितुम्।

इति निष्क्रान्तौ

इति निष्क्रान्ताः सर्वे

इति पञ्चमोऽङ्कः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ षष्ठोऽङ्कः

पूर्वाह्णः । रङ्गप्राङ्गणम् ।

(कुमाराणामुपवेशाय कौशेयावृतकटाः पर्याप्ताः सन्ति । अग्रे वेदिकायां कुलाचार्यप्रधानाचार्ययोः उपवेशासने स्वर्णसूत्रस्यूततुलिकावृते स्तः । पार्श्वयोर्निमन्त्रितविशिष्टातिथिद्वयस्यासनमस्ति । ततः प्रविशन्ति प्रधानाचार्यो द्रोणः, कुलाचार्यः कृपः, राजकुमाराश्च ।)

कुलाचार्यः- भो राजकुमाराः ! एतद् भवतां परमसौभाग्यं यत् सम्प्रति कौशिक इव परशुराम इव च दिव्यास्त्ररहस्यवित् प्रधानाचार्यो लब्धः । भवद्भिः समयं सदुपयुज्य आचार्यादस्त्रज्ञानं प्राप्तव्यम् । सोमवंश्यानां दुष्यन्तभरतययातिशन्तनुप्रभृतीनां राज्ञां चक्रवर्तित्वपरम्परायां भवद्भिरपि दिव्यास्त्राणां ज्ञानमधिगत्य शौर्यं प्रदर्श्य च पूर्वजवद् दिक्चतुष्टये यशप्रकाशो विस्तारणीयः । भवन्तः शूराः स्फूर्तिमन्तश्च सन्तीति हेतोर्दिव्यास्त्ररहस्यबोधे पारङ्गता भविष्यन्तीति अस्मद्विश्वासो वर्ततेतराम् ।

प्रधानाचार्यः- कुमाराः ! भवद्भिः कुलाचार्यस्य प्रेरणावचः श्रुतम्, कुरुराजरक्षकस्य पितामहशान्तनवस्य शुभाशिषश्च प्राप्ताः । प्रकृतिश्च भवत्सु महतीमाशां बध्नाति । समेषां कामना भवद्भिः पूरणीया । अप्यवगतम् ?

राजकुमारः- अवगतं प्रधानाचार्य ! वयं शस्त्रास्त्रप्रावीण्यं प्राप्य मान्यानां विश्वासं वर्धयिष्यामः ।

प्रधानाचार्यः- एतदेव आशास्यते भवद्भ्यः । राज्यं रक्षित्वा, वर्धित्वा, सुशासनं संस्थाप्य च क्षत्रियैर्व्यक्ते राष्ट्रस्य च पूर्वसुरक्षणाय राष्ट्रे शान्तिसुव्यवस्थयोः सततं स्थापनायाऽपि शस्त्रास्त्रकौशलमर्जितव्यमेव । भवन्तो दत्तावधाना भवन्तु । अहं पात्रस्य क्षमतानुसारेण दिव्यास्त्राणामादानसन्धानसंहारान् शिक्षयिष्ये ।

राजकुमारः- एतदस्माकमहोभाग्यम्, आचार्यवर !

प्रधानाचार्यः- कुमारैः सर्वथैतदवधेयं यदात्मसुरक्षणाय न कदाचिदपि दिव्यास्त्रस्य सन्धानं विधातव्यम् । प्रतिद्वन्द्विना प्रयुक्ते तन्निराकरणायैव प्रयोक्तव्यम् । तत्राऽपि ब्रह्मशीर्षं नारायणास्त्रञ्च न जातुचित् प्रयोक्तव्ये । विना स्वप्राणसङ्कटमन्यस्य प्राणा न हर्तव्याः । बुद्धमेतद् ?

राजकुमारः- बुद्धमाचार्यवर !

प्रधानाचार्यः- दिव्यास्त्रप्राप्तये न केवलं शरीरशुद्धिः परमात्मशुद्धिश्च विधातव्या । तदर्थं दिव्यास्त्रदेवान् नमत ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(राजकुमारादिव्यास्त्रदेवान् नमन्ति)

प्रधानाचार्यः- प्रार्थयत- भो अग्निदेव, महयमग्न्यास्त्रमर्पय। वाक्यमिदं त्रिरावर्तयत।

राजकुमारः- भो अग्निदेव ! मह्यमग्न्यास्त्रमर्पय (वारत्रयं वाक्यमिदं प्रार्थनास्वरूपेण पठन्ति)

प्रधानाचार्यः- दिव्यास्त्रग्रहणाय सावधाना भवत।

राजकुमारः- अवहिताः स्म आचार्यवत्।

आचार्यः- भो अग्निदेव ! एतेषामुत्तमकुलजानां सोमवंश्यानां क्षत्रियकुमाराणां शक्तिसम्पन्नतायै भावत्कं दिव्यास्त्रमावाहयामि।

(प्रकाशपुञ्ज आविर्भवति)

प्रधानाचार्यः- युधिष्ठिर ! अत्रागत्य अग्न्यास्त्रं गृहाण। (युधिष्ठिरः आचार्यमग्न्यास्त्रञ्च प्रणमति। आचार्यो युधिष्ठिरस्य अग्न्यास्त्रमन्त्रं तत्सन्धानमोक्षणरहस्य दिशति। युधिष्ठिरो देहकम्पनं संसूच्य अग्न्यास्त्रग्रहणमभिनयति।)

प्रधानाचार्यः- भीम ! दिव्यास्त्रग्रहणायावहितो भव।

भीमः- आचार्यवर, अवहितोऽस्मि।

दुर्योधनः- (सरोषमाचार्यसन्निधिमेत्य) गुरो ! भवान् मामग्न्यास्त्रं नोपदिश्य कथं पूर्वं भीममाह्वयति ?

प्रधानाचार्यः- पाण्डुसुता अनुशिष्टाः सन्ति। एतेऽपि राजकुमाराः। एतेषां संख्याऽपि पञ्चैव। त्वरितमेतेषाम् अद्यतनीयमस्त्रशिक्षणं संमाप्स्यते। तदनु ज्येष्ठताक्रमेण युष्मान्नाह्वयामि।

दुर्योधनः- नैतद् युक्तम्। अहं महाराजतनयो ज्येष्ठो राजकुमारः। राज्याधिकारी चाऽहमेव। युधिष्ठिरात् पूर्वं मह्यं दिव्यास्त्रं प्रदातव्यमासीत्। तथापि ममाप्यग्रज इति मत्वा मया तत् सोढम्, परमेतन्न सहे।

कुलाचार्यः- कुमारदुर्योधन ! गुरुजनैर्निर्धारितं नियमं कथं न मनुषे ?

दुर्योधनः- आचार्य एषोऽपि नियमः ? अहं महाराजस्य ज्येष्ठसुतो भावियुवराजः। मत्तोऽग्रे अस्मत् पिण्डभुजः पाण्डुसुताः कथं पुरस्सार्यन्ते।

प्रधानाचार्यः- कुमार दुर्योधन ! शृणु भीमसेनस्त्वत्तो ज्येष्ठ इति कारणादेनमुपदिश्य त्वां शिक्षयिष्ये।

दुर्योधनः- आचार्य ! महाराजतनयत्वाद् भावियुवराजत्वादपि भीमात् पूर्वमहमुपदेष्टव्यः।

भीमः- आचार्य ! एष अकारणमेवास्मान् द्वेष्टि, अनुशासनहीनश्चास्ति। वस्तुतोऽननुशिष्टो दिव्यास्त्रग्रहणस्याधिकारी एव न। अहमेव दिव्यास्त्रप्राप्तेः अधिकारी।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुर्योधनः- (मुष्टिमुद्यम्य) आचार्य ! अहमधुनैव भीमं ताडयामि । असौ मां दिव्यात्रस्याधिकारीं नेति आक्षिपति ।

भीमः- (सरोषं विलोक्य) गुरुशुश्रूषया विद्येति कथ्यते । गुर्वाज्ञाया अवमन्ताऽसौ सत्यमेव शिक्षाधिकारी न ।

दुर्योधनः मुष्टिमुद्यम्य धावति । भीमोऽपि प्रत्याक्रमणाय गच्छति । युधिष्ठिरो भीमं वारयति

प्रधानाचार्यः- कुमाराः विवादेन शिक्षा नैव वर्धते ।

युधिष्ठिरः- (प्रणम्य) आचार्य ! भीमात् प्राग् भ्रातरं दुर्योधनमुपदेष्टुम् अनुरुणद्धि्म । यतो हि विद्या समन्वयादेव प्राप्यते, न विवादेन । (भीमोऽसहमतः सन्नपि भ्रातुराज्ञेति मत्वा मौनं तिष्ठति ।)

प्रधानाचार्यः- साधु युधिष्ठिरः, साधु दृष्ट्यनुसारिणी सृष्टिरिति लोकभणितिर्भवति घटते । एवमाह्वयामि दुर्योधनम् । कुमारदुर्योधन ! अत्राऽऽयाहि ।

दुर्योधनः- एषोऽस्मि प्रधानाचार्यः ।

प्रधानाचार्यः- अहं भवते आग्नेयास्त्ररहस्यं वच्मि ।

दुर्योधनः- मयैतत् प्राप्तव्यमेव ।

प्रधानाचार्यः- शृणु आग्नेयास्त्रस्य सामर्थ्यम् ।

शब्दं कृत्वा चटचटचटत् सर्वतोऽग्नेः स्फुलिङ्गा
आग्नेयास्त्राज् जगति भयदा विश्वगाविर्भवन्ति ।
ग्रासं ग्रासं शमन इव किं विश्वमाधक्ष्यतीव
सर्वं दग्धुं प्रभवति द्रुतं भीममाग्नेयमस्त्रम् ॥

(तदनु दिव्यास्त्रस्य आवाहनसन्धानमोक्षणविधिं शिक्षयति । शिष्यः शरीरकम्पनमाध्यमेनास्त्रप्राप्तिं सूचयति)

दुर्योधनः- आचार्य ! अन्यान्यस्त्राणि कदा प्राप्स्ये ।

आचार्यः- मा त्वरय । औचित्यमाधृत्य यथासमयं शिक्षयिष्ये । इदानीं भीम ! आयाहि ।

भीमः- एषोऽस्मि आचार्यः ।

आचार्यः- नमस्कृत्योपविश । भो आग्नेयदिव्यास्त्र आविर्भव ।
(ज्योतिराविर्भवति । भीमः कम्पनमाध्यमेनास्त्रप्राप्तिं सूचयति ।)
कुमाराः पर्जन्यास्त्रस्य महत्त्वं शृणुत-

कुमाराः- अवहिताः स्मः ।

आचार्यः- नत्वा देवं सुरपतिमतो मन्त्रतः प्रार्थ्यमाने
पर्जन्यास्त्रं भवति प्रकटं तोयधाराः प्रवाह्य ।
अग्नेर्यावान् भवतु निचयः शाम्यते तोयवृष्ट्या
प्रादुर्भूतः किमु जलनिधिः शङ्क्यते लोकबुद्ध्या ॥
प्रणम्य प्रार्थयत, अहं युगपदेव युस्मान् दिव्यास्त्रमुपदिशामि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुमाराः- भो पर्जन्यास्त्र, नमस्ते आविर्भव । (पर्जन्यास्त्रामाविर्भवति)
(आचार्यो दिव्यास्त्रस्य आवाहनमन्त्रं सन्धानमोक्षणविधिञ्चोपदिशति)

आचार्यः- कुमाराः, वायव्यास्त्रमावाहयत-

कुमाराः- (वायुदेवं नत्वा वायव्यास्त्रमावाहयन्ति)
(वायव्यास्त्रमाविर्भवति)

आचार्यः- कुमारा अवहिता भवत वायव्यास्त्रमुपदिशामि ।

कुमाराः- आचार्य ! अवहिताः स्मः ।
(आचार्यो वायव्यास्त्रस्य सन्धानप्रयोगौ शिक्षयति)

आचार्यः- वायव्यास्त्रस्य शक्तिं बुद्ध-
वायव्यास्त्रे समरजयिना मन्त्रतः प्रार्थ्यमाने
वात्यारूपो वहति पवतो लोकदृष्टिं प्रमुष्य ।
गेहान् भित्तीस्तृणतरुलता धूलिसात्कृत्य शीघ्रं
शत्रोः शौर्यं क्षपयति जवाद् वातजं दिव्यमस्त्रम् ॥

कुमाराः- आचार्य, विपुलशक्तिकमशस्त्रमिदम् ।

आचार्यः- सत्यम् । सावधाननैतत् प्रयोक्तव्यम् ।

कुमाराः- आचार्य ! एवमेव विधाष्यामः ।

आचार्यः- कुमाराः अतः परं वरुणदेवं ध्यायत-
(कुमारा वरुणं ध्यायन्ति । वरुणास्त्रमाविर्भवति । गुरोः प्रार्थनया तदस्त्रं प्रत्येकं राजकुमारस्य तनौ विशति । कुमारा अस्त्रप्राप्त्या मोदन्ते ।)

आचार्यः- कुमाराः । वरुणास्त्रमहत्त्वमेवं जानीत-
भूमेरन्तर्निहितसलिलं यद् गभीराद् गभीरं
सिद्धे चास्त्रे वरुणभगवद्ध्यानतो लभ्यते ह ।
आग्नेयास्त्रं शमयितुमथो सैन्यत्रासाय शत्रो-
रस्त्रं चैतद् जलपतिभवं युज्यते वीरवर्यैः ॥

कुमाराः- कृतार्थाः स्मः ।

आचार्यः- पर्वतास्त्रं ग्रहीतुमवहिताः भवत ।

कुमाराः- पर्वतास्त्रस्य कियती शक्तिरस्ति आचार्य ।

आचार्यः- शृणुत-
वायव्यास्त्रे युधि विजयिना सन्धिते बाणकूटे
वात्या भीमा भवति किल या शाम्यते साऽमुना वै ।
शैला अग्रे पवनसरणौ पर्वतास्त्राद् भवन्ति
शूरा युद्धं खलु सहजतः पर्वतास्त्राद् जयन्ति ॥

कुमाराः- विस्मयावहान्यस्त्राणि किल ।

आचार्यः- अथ किम् । एतेषामस्त्राणामावाहनसन्धानमोक्षणानि न विस्मरत ।
श्वः परमदिव्यास्त्राणां सम्बन्धे उपदेष्टाऽस्मि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुमाराः- कृतार्थाः स्मः । साधयामस्तावत् ।

(इति निष्क्रान्ताः)

द्वितीयं दृश्यम्

अभ्यासाङ्गनम् । अपराह्णः ।

(ततः प्रविशन्ति प्रधानाचार्यः, कुलाचार्यः, धनुर्धराः कुमाराश्च)

मञ्चमध्ये कुलाचार्यः प्रधानाचार्यश्च विराजेते । कुमाराः पार्श्वयोरासनेषु सत्स्वपि मध्याङ्गने उत्थिताः सन्ति ।)

प्रधानाचार्यः- कुमाराः अधुनाऽहं ब्रह्मास्त्रमुपदिन्सुरस्मि । युस्माभिरेतदवध्येयं यत् ब्रह्मास्त्रं यस्मै कस्मै दातुं न शक्यते । तस्याधिकारिता परीक्षणीया भवति ।

दुर्योधनः- आचार्य ! प्रथमं मह्यं ब्रह्मास्त्रमुपदिशतु ।

प्रधानाचार्यः- कुमार दुर्योधन ! त्वं ब्रह्मास्त्रस्याधिकारी भवितुं न शक्नोसि ।

दुर्योधनः- किमर्थमाचार्य !

आचार्यः- त्वं शीघ्रं कुप्यसि, पाण्डवेष्वसूयां प्रकटयसि । त्वत्तो ब्रह्मास्त्रस्य सदुपयोगो न भवतीति ।

दुर्योधनः- पाण्डवेभ्य एव ब्रह्मास्त्रमुपदेष्टुं भवतोऽयं प्रपञ्चो दृश्यते ।

आचार्यः- न हि अहमेतदस्त्रं पाण्डवेषु केवलमर्जुनायैवोपदिशामि । न भीमाय, न युधिष्ठिराय च । भीमं त्वाञ्च विशेषेण मल्लयुद्धं गदाप्रहारञ्च शिक्षयिष्ये । नाग-गारुंडसंमोहनादीनि दिव्यास्त्राण्यपि उपदिशामि ।

दुर्योधनः- एष महानन्यायः । आचार्य ! भवानस्मान् ब्रह्मास्त्रं नोपदिशति चेरद्यतनं पाठोपवेशं वयं बहिष्कुर्मः) । (ततो धृतराष्ट्रतनयाः सर्वे निष्कामन्ति । केवलं पाण्डुतनयाः, अश्वत्थामा च तिष्ठन्ति ।)

आचार्यः- कुमार अर्जुन ! जलमाचाम ।

(अर्जुनो जलमाचामति)

आचार्यः- भो ब्रह्मन् ! वन्दे भवन्तम् । क्षत्रियकुलावतंसस्य अर्जुनाऽभिधकुमारस्य शक्तये भावत्कमस्त्रमावाहयामि । कृपां करोतु ।

ब्रह्मास्त्रमुपदिशति । ब्रह्मणे नमः इति मन्त्रश्रावणपूर्वकंतत्सधानप्रयोगसंहरणविधीञ्च शिक्षयति ।)

अर्जुनः- कृतार्थोऽस्मि आचार्यवर ! । अस्यास्त्रस्य सामर्थ्यं जिज्ञासामि ।

आचार्यः- शृणु-

दीर्घं तप्त्वा हरिहरकृपां प्राप्य ब्रह्मास्त्रमेतत्
प्राप्तं धात्रा सुरमुनिवरान् रक्षितुं दस्युवर्गात् ।
नैजे स्वार्थे न हि हितकरं सेत्स्यतीदं महास्त्रं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राष्ट्रस्यार्थे भयदसमये शक्यतेऽस्त्रं प्रयोक्तुम् ॥

अर्जुनः- आचार्य ! महामहिममण्डितं नूनमेतद् दिव्यास्त्रम् ।

आचार्यः- अथ किम् । महास्त्रमेतद् यस्मिन् कस्मिन् समये न प्रयोक्तव्यमिति जानीहि ।

अर्जुनः- आचार्य ! दुर्दम्यसङ्कटे एव प्रयोक्ष्ये ।

आचार्यः- तत्र च विचार्यैव । अद्यैतावन्मात्रम् । अपरदिने व्यूहरचनायाः, दुर्गनिर्माण्स्य, रथसञ्चालनस्य च सम्बन्धे उपदेष्टाऽस्मि । राजभवनमेत्य प्राङ्गणेऽभ्यसत ।

कुमाराः- आचार्य एवमेव करिष्यामहे ॥

(इति निष्क्रान्ताः सर्वे)

तृतीयं दृश्यम्

अभ्यासाङ्गनम् । अपराह्णः ।

(ततः प्रविशन्ति प्रधानाचार्यः कुलाचार्यः राजकुमाराश्च)

प्रधानाचार्यः- अद्यतनी कक्षा व्यूहरचनायाः सम्बन्धे वर्तते । व्यूह इति समवायः विशेषेणैष शब्दः सैन्यविन्यासे प्रयुज्यते । सैन्यानां विशिष्टसन्निवेश एव व्यूह इति बोद्धव्यम् । पूर्वजा विशिष्टव्यूहं विरचय्य महारथिनो विपक्षानपि जिग्युः ।

कुमाराः- आचार्य ! व्यूहस्य प्रकारा अपि भवेयुः ।

आचार्यः- सन्ति, ते च यथा- महाव्यूह-चक्रव्यूह-गरुडव्यूह-व्यालव्यूह-शकटव्यूह-चक्रशकटव्यूह-मकरव्यूह-क्रौञ्चव्यूहप्रभृतयः । स्वबुद्ध्यनुसारेण शैलगह्वरव्यूहादयश्च निर्मातुं शक्यन्ते ।

कुमाराः- आचार्य ! कतिचन व्यूहानां स्वरूपं बोद्धुमिच्छामः ।

आचार्यः- शृणुत कुमाराः, चक्राकारेण सैन्यसमावेशनं चक्रव्यूह इति । यत्र चतुर्बलयतया ततोऽधिकया पञ्चषट्सप्ताष्टबलयतया वा परिवेष्ट्य सायुधानि सैन्यानि स्थाप्यन्ते । औचित्यानुसारेण सैन्यपरिवेष्टनानि निर्धारयितव्यानि । प्रतिवलयं चतसृषु दिक्षु न्यूनतोऽप्येकैकमिति कृत्वा महारथिनस्तिष्ठन्ति । सैन्यचक्रस्य मध्ये सेनापतिस्तिष्ठति ।

कुमाराः- आचार्य ! व्यूहभेदनं कठिनतमं दृश्यते ।

आचार्यः- एवम्, तथाप्यतिरथिनो धानुष्कास्तादृशमपि व्यूहं सहजतया भञ्जन्ति । सोमवंश्याः सूर्यवंश्याश्च बहव एव भूपतयस्तादृशान् व्यूहानपि सहजतया व्यभञ्जन्निति श्रूयते ।

(पटाक्षेपेण प्रविश्य)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काञ्चुकीयः- (प्रणम्य)आचार्य ! अतिरथी पितामहो भीष्मो राजकुमारान् दिदृक्षति ।

प्रधानाध्यापकः एवम् । कुमारा अत्र सन्ति । स द्रष्टुं शक्ष्यति ।

इति निष्क्रान्ताः

चतुर्थं दृश्यम्

पितामहस्य सभाकक्षः । सन्ध्यासमयः ।

ततः प्रविशन्ति पितामहो भीष्मः, महामन्त्री विदुरः, प्रधानाचायी द्रोणः, कुलाचार्यः कृपश्चाअत्रान्तरे गुरुपुत्र अश्वत्थामा, राजकुमाराश्चप्रविशन्ति ।

अश्वत्थामा राजकुमाराश्च- वन्दामहे पितामहं महामन्त्रिणं कुलाचार्यं प्रधानाचार्यञ्च ।

सर्वे- शौर्यवन्तो भवत कुमाराः ।

पितामहः- प्रधानाचार्यकुलाचार्यौ वन्दे ।

प्रधानाचार्यः- स्वस्त्यस्तु पुरुकुलावतंसाय ।

कुलाचार्यः- स्वस्त्यस्तु पुरुकुलगौरवाय ।

पितामहः- कुमाराः ! अपि युष्माभिरायुधकौशलमधिगतम् ?

कुमाराः- अधिगतं पितामह ।

पितामहः- नैतिकादर्शा अपि आचार्यैः प्रशिक्षिता भवेयुः ।

कुमाराः- तत्राऽपि प्रशिक्षिताः स्मः ।

पितामहः- कुमार दुर्योधन ! एवं चेत् कञ्चन साधुचरितं भद्रपुरुषमानय ।

दुर्योधनः- अवश्यमानेष्यामि ।

पितामहः- कुमार ! सप्ताहात्मकः समयोऽस्ति ।

दुर्योधनः- पितामह ! अद्यैव भद्रपुरुषमानयामि नावश्यकता सप्ताहस्य ।

पितामहः- साधय भद्रपुरुषान्वेषणाय ।

दुर्योधनः- पितामह, साधयामि भद्रमन्वेष्टुम् । (निर्याति)

पितामहः- कुमार ! युधिष्ठिर ! एकमसत्पुरुषमानय ।

युधिष्ठिरः- पितामह ! किमधुनैव ।

पितामहः- सप्ताहावधावानय ।

युधिष्ठिरः- सौभाग्यमेतन्मम गुर्वादेशगौरवं प्राप्तम् ।

पितामहः- साधयाऽसत्पुरुषान्वेषणाय ।

युधिष्ठिरः- पितामह ! एष गतोऽसत्पुरुषान्वेषणाय ।

पितामहः- स्वकार्ये सफलो भव ।

युधिष्ठिरः- अनुगृहीतोऽस्मि ।

(निष्क्रामति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पितामहः- (कुलाचार्यं प्रति) केवलं परम्परागतशिक्षया कुमारा व्यवहारकुशला न भवन्ति । एतेभ्यो नैतिकशिक्षा, राजनीतिः व्यावहारिकशिक्षा च प्रदातव्याः ।

कुलाचार्यः- पौरव ! सन्दर्भोऽयमस्माभिर्ध्यात एव । कुमाराश्च यथाशक्ति प्रशिक्षिताः सन्ति ।

पितामहः- भवद्भ्य एतदेवाऽऽशासे ।

(प्रविश्य)

दुर्योधनः- पितामहं वन्दे ।

पितामहः- वत्स ! अपि भद्रपुरुषो मिलितः ।

दुर्योधनः- नैकोऽपि भद्रजनो मिलितः ।

पितामहः- कथमिव ?

दुर्योधनः- नैकमपि जनं निर्दोषं पश्यामि । न्यूना वा अधिका दोषाः सर्वेष्वेव दृष्टाः ।

पितामहः- कुमार शृणु । एष तव दृष्टिदोषः । कथमिव ? त्वं सर्वान् सदोषान् पश्यसि । तस्य गुणपक्षे तव दृष्टिर्न गच्छति ।

दुर्योधनः- दोषो दृश्यते । कथं तादृशं निर्दोषं वक्ष्ये ।

पितामहः- कुलाचार्यः प्रधानाचार्यश्च अग्रे स्तः । महात्मा विदुरः माता गान्धारी, पिता महाराजः अग्रजो युधिष्ठिरः अहञ्च पुरतः स्मः परं त्वमस्मान् न गणयसि । कुलाचार्यादयोऽभद्रपुरुषाः सन्ति किमु ?

दुर्योधनः- न तथा ।

पितामहः- न तथा चेत् कुलाचार्यं किन्न गणयसि ? किं वा पितृव्यं विदुरं भद्रपुरुषं न पश्यसि । युधिष्ठिरस्यैकमपि दोषमाख्याहि । सतीशिरोमणिः गान्धारी कथं सदोषा ? एवं स्थितावपि त्वं कमपि भद्रपुरुषं न पश्यसि ।

(प्रविश्य)

युधिष्ठिरः- वन्दे पितामहम्, आदरणीयान् मान्यजनाँश्च ।

पितामहः- वत्स कथय । अपि त्वया न प्राप्तोऽभद्रपुरुषः ।

युधिष्ठिरः- पितामह ! अभद्रजनो न मिलितः । यं यं पश्यामि तं तं गुणिनमेव । गुणहीनो नैकोऽपि जनो दृष्टः । गुणाः गुणा एव । द्वित्रा वा पञ्चषाः कथं न भवेयुः ।

पितामहः- साधु वत्स साधु । सर्वथा निर्मलाऽस्ति ते दृष्टिः । सर्वथा एवंविधया दृष्ट्या सर्वान् पश्य । गुणग्राही भव ।

युधिष्ठिरः- पितामहस्य शुभाशिषः फलन्तु नाम ।

पितामहः- कुमार दुर्योधन ! त्वमन्यथा न चिन्तय । त्वयि दृष्टिदोषो वर्तते । मदाऽसूयाकोपलोभादिभिर्मनसि स्थाने प्राप्ते एवंविधो दृष्टिदोष

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्पद्यते, येन जनोऽन्यान् न गणयति । दृष्ट्यनुसारिणी सृष्टिर्भवति । स्वप्नायिते जगति गुणवतैव भाव्यं नाननुगुणवता ।

दुर्योधनः- पितामह ! भवन्तोऽस्मान् दोषदृष्ट्या पश्यन्ति । पाण्डवाः सर्वथा निर्दुष्टाः, वयं सर्वथा दुष्टा इति ।

पितामहः- वत्स अहं न व्यक्तिं परं व्यक्तेः प्रवृत्तिं निर्दिशामि । व्यक्तिर्न जातुचिदपि दुष्टा निर्दुष्टा वा भवति । तस्याः प्रवृत्तिमालक्ष्य दुष्टा निर्दुष्टेति जना व्यवदिशन्ति । तथाहि-

उदेति मनसश्चलात् स्वपरभेददृष्टिभ्रमस्
ततो गुणविपर्ययो भवति दोषदृष्टिस्ततः
ततः शुभमथोऽशुभं किमपि नैव विज्ञायते
तदर्थमिह सात्त्विकी मतिरहो विधेया जनैः ॥

वत्सा ! मयोक्तं गुरुजनैरुक्तञ्च तथ्यमात्मसात् कृत्वा जीवनं कर्ममयं निर्मात । अस्माकं शुभेच्छा फलवती भवतु । सम्प्रति साधयत तावद् विद्यामभ्यसितु स्वस्ववासस्थाने ।

कुमाराः- पितामह ! भवतो निर्देशनं पालयितुं प्रतिबद्धतां व्याहरामः ।

पितामहः- अतः परमपि भवतां कि प्रियं करवाणि । तथाप्येतदस्तु-भरतवाक्यम्-

क्षमादयातोषविवेकतोयै-
र्धरालता स्यात् फलिनी सपुष्पा ।
ऐक्यात् सुभावाद् मनुजा रमन्तां
कला विभिन्ना । प्रसरन्तु भूम्याम् ॥

(इति निष्क्रान्ताः सर्वे)

(इति षष्ठोऽङ्कः)

सम्पूर्णमिदं पूर्णाङ्कीयं दृष्टिसृष्टिनाटकम् ॥

●●●

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्) - डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्) - महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा - डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्) - डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्) - संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम् - प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ? - अनुसन्धानात्मकलेखसङ्ग्रहः
८. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते) - अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम् - अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम् - प्रा. रेवतीरमणः खनालः
१२. गौतमन्यायसूत्रम् - अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम् - अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्) - संयुक्तसम्पादनम्
१६. कामकलाविलास - प्रा. विद्यानाथ-उपाध्यायः
१७. जैनदर्शनं - तत्त्वार्थसूत्रम् - डा. चन्द्रमणिनेपालः
१८. दर्शनसारामृतम् - लोकनाथलुइँटेलः
१९. मीमांसापरिभाषा - प्रा.डा. ऋषिरामपोखरेलः
२०. समीक्षात्मकग्रन्थ - ध्रुवभट्टराई
२१. ब्रम्हाण्डपुराण - डा. बद्रीपोखेलः
२२. नेपालगौरवम् (महाकाव्यम्) - प्रा.डा. विष्णुप्रसादः देवकोटा
२३. संस्कृतकाव्यसिद्धान्त समीक्षा - डा. नवराज कट्टेल
२४. कर्मफलम् (संस्कृतरूपकसङ्ग्रहः) - प्रा.डा. नवराजकट्टेलः
२५. कवि पण्डित गायत्री गणेशप्रसाद अर्यालका ... - प्रा.डा. नवराज कट्टेल
२६. आचारिकं नाटकम् - प्रा. रामहरिदाहालः
२७. गुरुकुलचर्यम् - प्रा. रामहरिदाहालः
२८. सत्प्रभवं नाटकम् - प्रा. रामहरिदाहालः
२९. दृष्टिसृष्टिनाटकम् - प्रा. रामहरिदाहालः
३०. नेपालमाता (नाटकम्) - नारायणदत्तशास्त्री
३१. मित्रसङ्गमम् नाटकम् - आचार्यः खेमराजकेशवशरणः
३२. कृष्णागारोज्जीवनम् नाटकम् - प्रा.डा. विष्णुप्रसादः देवकोटा
३३. मातृशतकम् (शोककाव्यम्) - प्रा.डा. नवराजकट्टेलः
३४. पृथ्वीशतकम् (खण्डकाव्यम्) - प्रा.डा. नवराजकट्टेलः
३५. संस्कृतनाटिकाकौस्तुभः (लघुरूपकसंग्रहः) - सम्पा. प्रा.डा. विष्णुप्रसादः देवकोटा

ISBN 978-9937-9491-8-7
9 789937 949187